# bRihatpArAsharahorAshAstramh 21-30

# બૃહત્પારાશરહોરાશાસ્ત્રમ્ ૨૧-૩૦

## Document Information

Text title : bRihatpArAsharahorAshAstram.h 21-30

File name : par2130.itx

Category : jyotisha, sociology_astrology, bRihatpArAshara

Location : doc_z_misc_sociology_astrology

Transliterated by : Ahto Jarve ajarve at fms30.cca.rockwell.com

Proofread by : Ahto Jarve ajarve at fms30.cca.rockwell.com

Latest update : November 1, 2010

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# bRihatpArAsharahorAshAstramh 21-30

# બૃહત્પારાશરહોરાશાસ્ત્રમ્ ૨૧-૩૦

અથ કર્મભાવફલાધ્યાયઃ ॥ ૨૧॥

કર્મભાવફલં ચાઽથ કથયામિ તવાગ્રતઃ ।
સૃણુ મૈત્રેય તત્ત્વેન બ્રહ્મગર્ગાદિભાષિતમ્ ॥ ૧॥

સબલે કર્મભાવેશે સ્વોચ્ચે સ્વાંશે સ્વરાશિગે ।
જાતસ્તાતસુખેનાઢ્યો યશસ્વી શુભકર્મકૃત્ ॥ ૨॥

કર્માધિપો બલોનશ્ચેત્ કર્મવૈકલ્યમાદિશેત્ ।
સૈહિઃ કેન્દ્રત્રિકોણસ્થો જ્યોતિષ્ટોમાદિયાગકૃત્ ॥ ૩॥

કર્મેશે શુભસંયુક્તે શુભસ્થાનગતે તથા ।
રાજદ્વારે ચ વાણિજ્યે સદા લાભોઽન્યથાન્યથા ॥ ૪॥

દશમે પાપસંયુક્તે લાભે પાપસમન્વિતે ।
દુષ્કૃતિં લભતે મર્ત્યઃ સ્વજનાનાં વિદૂષકઃ ॥ ૫॥

કર્મેશે નાશરાશિસ્થે રાહુણા સંયુતે તથા ।
જનદ્વેષી મહામૂર્ખો દુષ્કૃતિં લભતે નરઃ ॥ ૬॥

કર્મેશે દ્યૂનરાશિસ્થે મન્દભૌમસમન્વિતે ।
દ્યૂનેશે પાપસંયુતે શિશ્નોદરપરાયણઃ ॥ ૭॥

તુઙ્ગરાશિં સમાશ્રિત્ય કર્મેશે ગુરુસંયુતે ।
ભાગ્યેશે કર્મરાશિસ્થે માનૈશ્વર્યપ્રતાપવાન્ ॥ ૮॥

લાભેશે કર્મરાશિસ્થે કર્મેશે લગ્નસંયુતે ।
તાવુભૌ કેન્દ્રગૌ વાપિ સુખજીવનભાગ્ ભવેત્ ॥ ૯॥

કર્મેશે બલસંયુક્તે મીને ગુરુસમન્વિતે ।
વસ્ત્રાભરણસૌખ્યાદિ લભતે નાત્ર સંશયઃ ॥ ૧૦॥

લાભસ્થાનગતે સૂર્યે રાહુભૌમસમન્વિતે ।
રવિપુત્રેણ સંયુક્તે કર્મચ્છેત્તા ભવેન્નરઃ ॥ ૧૧॥

મીને જીવે ભૃગુયુતે લગ્નેશે બલસંયુતે ।
સ્વોચ્ચરાશિગતે ચન્દ્રે સમ્યગ્જ્ઞાનાર્થવાન્ ભવેત્ ॥ ૧૨॥

કેન્દ્રેશે લાભરાશિસ્થે લાભેશે લગ્નસંસ્થિતે ।
કર્મરાશિસ્થિતે શુક્રે રત્નવાન્ સ નરો ભવેત્ ॥ ૧૩॥

કેન્દ્રત્રિકોણગે કર્મનાથે સ્વોચ્ચસમાશ્રિતે ।
ગુરુણા સહિતે દૃષ્ટે સ કર્મસહિતો ભવેત્ ॥ ૧૪॥

કર્મેશે લગ્નભાવસ્થે લગ્નેશેન સમન્વિતે ।
કેન્દ્રત્રિકોણગે ચન્દ્રે સત્કર્મનિરતો ભવેત્ ॥ ૧૫॥

કર્મસ્થાનગતે મન્દે નીચખેચરસંયુતે ।
કર્માંશે પાપસંયુક્તે કર્મહીનો ભવેન્નરઃ ॥ ૧૬॥

કર્મેશે નાશરાશિસ્થે રન્ધ્રેશે કર્મસંસ્થિતે ।
પાપગ્રહેણ સંયુક્તે દુષ્કર્મ નિરતો ભવેત્ ॥ ૧૭॥

કર્મેશે નીચરાશિસ્થે કર્મસ્થે પાપખેચરે ।
કર્મભાત્કર્મગે પાપે કર્મવૈકલ્યમાદિશેત્ ॥ ૧૮॥

કર્મસ્થાનગતે ચન્દ્રે તદીશે તત્ત્રિકોણગે ।
લગ્નેશે કેન્દ્રભાવસ્થે સત્કીર્તિસહિતો ભવેત્ ॥ ૧૯॥

લાભેશે કર્મભાવસ્થે કર્મેશે બલસંયુક્તે ।
દેવેન્દ્રગુરુણા દૃષ્ટે સત્કીર્તિસહિતો ભવેત્ ॥ ૨૦॥

કર્મસ્થાનાધિપે ભાગ્યે લગ્નેશે કર્મસંયુતે ।
લગ્નાત્ પઞ્ચમગે ચન્દ્રે ખ્યાતનામા નરો ભવેત્ ॥ ૨૧॥

ઇતિ કર્મફલં પ્રોક્તં સંક્ષેપેણ દ્વિજોત્તમ ।
લગ્નકર્મેશસમ્બન્ધાદૂહ્યમન્યદપિ સ્વયમ્ ॥ ૨૨॥

---

## અથ લાભભાવફલાધ્યાયઃ ॥ ૨૨॥

લાભભાવફલઞ્ચાથ કથયામિ દ્વિજોત્તમ ।
શ્રૂયતાં જાતકો લોકે યચ્છુભત્વે સદા સુખી ॥ ૧॥

લાભાધિપો યદા લાભે તિષ્ટેત્ કેન્દ્રત્રિકોણયોઃ ।
બહુલાભં તદા કુર્યાદુચ્ચે સૂર્યાંશગોઽપિ વા ॥ ૨॥

લાભેશે ધનરાશિસ્થે ધનેશે કેન્દ્રસંસ્થિતે ।
ગુરુણા સહિતે ભાવે ગુરુલાભં વિનિર્દિશેત્ ॥ ૩॥

લાભેશે વિક્રમે ભાવે શુભગ્રહસમન્વિતે ।
ષટ્ત્રિંશે વત્સરે પ્રાપ્તે સહસ્રદ્વયનિષ્કભાક્ ॥ ૪॥

કેન્દ્રત્રિકોણગે લાભનાથે શુભસમન્વિતે ।
ચત્વારિંશે તુ સમ્પ્રાપ્તે સહસ્રાર્ધસુનિષ્કભાક્ ॥ ૫॥

લાભસ્થાને ગુરુયુતે ધને ચન્દ્રસમન્વિતે ।
ભાગ્યસ્થાનગતે શુક્રે ષટ્સહસ્રાધિપો ભવેત્ ॥ ૬॥

લાભાચ્ચ લાભગે જીવે બુધચન્દ્રસમન્વિતે ।
ધનધાન્યાધિપઃ શ્રીમાન્રત્નાદ્યાભરણૈર્યુતઃ ॥ ૭॥

લાભેશે લગ્નભાવસ્થે લગ્નેશે લાભસંયુતે ।
ત્રયસ્ત્રિંશે તુ સમ્પ્રાપ્તે સહસ્રનિષ્કભાગ્ ભવેત્ ॥ ૮॥

ધનેશે લાભરાશિસ્થે લાભેશે ધનરાશિગે ।
વિવાહાત્પરતશ્ચૈવ બહુભાગ્યં સમાદિશેત્ ॥ ૯॥

ભ્રાતૃપે લાભરાશિસ્થે લાભેશે ભ્રાતૃસંસ્થિતે ।
ભ્રાતૃભાવાદ્ધનપ્રાપ્તિર્દિવ્યાભરણસંયુતઃ ॥ ૧૦॥

લાભેશે નીચભેઽસ્તે વા ત્રિકે પાપસમન્વિતે ।
કૃતે ભૂરિપ્રયત્નેઽપિ નૈવ લાભઃ કદાચન ॥ ૧૧॥

---

## અથ વ્યયભાવફલાધ્યાયઃ ॥ ૨૩॥

અથાહ વ્યયભાવસ્ય કથયામિ ફલં દ્વિજ ।
વ્યયેશે શુભસંયુક્તે સ્વભે સ્વોચ્ચગતેઽપિ વા ॥ ૧॥

વ્યયે ચ શુભસંયુક્તે શુભકાર્યે વ્યયસ્તદા ।
ચન્દ્રો વ્યયાધિપો ધર્મલાભમન્ત્રેષુ સંસ્થિતઃ ॥ ૨॥

સ્વોચ્ચે સ્વર્ક્ષે નિજાંશે વા લાભધર્માત્મજાંશકે ।

દિવ્યાગારાદિપર્યંકો દિવ્યગન્ધૈકભોગવાન્ ॥ ૩॥

પરાર્ધ્યરમણો દિવ્યવસ્ત્રમાલ્યાદિભૂષણઃ ।
પરાર્ધ્યવિત્તસંયુતો વિજ્ઞો દિનાનિ નયતિ પ્રભુઃ ॥ ૪॥

એવંસ્વશત્રુનીચાંશેઽષ્ટમાંશે વાઽષ્ટમે રિપૌ ।
સંસ્થિતઃ કુરુતે જાતં કાન્તાસુખવિવર્જિતમ્ ॥ ૫॥

વ્યયાધિક્યપરિક્લાન્તં દિવ્યભોગનિરાકૃતમ્ ।
સ હિ કેન્દ્રત્રિકોણસ્થઃ સ્વસ્ત્રિયાઽલંકૃતઃ સ્વયમ્ ॥ ૬॥

યથા લગ્નાત્ ફલં ચૈતદાત્મનઃ પરિકીર્તિતમ્ ।
એવં ભ્રાત્રાદિભાવેષુ તત્તત્સર્વં વિચારયેત્ ॥ ૭॥

દૃશ્યચક્રાર્ધગાઃ ખેટાઃ પ્રત્યક્ષફલદાયકાઃ ।
અદૃશ્યાર્ધગતાઃ ખેટાઃ પરોક્ષે ફલદાઃ સ્મૃતાઃ ॥ ૮॥

વ્યયસ્થાનગતોઃ રાહુર્ભૌમાર્કિરવિસંયુતઃ ।
તદીશેઽપ્યર્કસંયુક્તે નરકે પતનં ભવેત્ ॥ ૯॥

વ્યયસ્થાનગતે સૌમ્યે તદીશે સ્વોચ્ચરાશિગે ।
શુભયુક્તે સુભૈર્દૃષ્ટે મોક્સઃ સ્યાન્નાત્ર સંશયઃ ॥ ૧૦॥

વ્યયેશે પાપસંયુક્તે વ્યયે પાપસમન્વિતે ।
પાપગ્રહેણ સંદૃષ્ટે દેશાદ્દેશાન્તરં ગતઃ ॥ ૧૧॥

વ્યયેશે શુભરાશિસ્થે વ્યયર્ક્ષે શુભસંયુતે ।
શુભગ્રહેણ સંદૃષ્ટે સ્વદેશાત્ સઞ્ચરો ભવેત્ ॥ ૧૨॥

વ્યયે મન્દાદિસંયુક્તે ભૂમિજેન સમન્વિતે ।
સુ/ભદૃષ્ટેર્ન સમ્પ્રાપ્તિઃ પાપમૂલાદ્ધનાર્જનમ્ ॥ ૧૩॥

લગ્નેશે વ્યયરાશિસ્થે વ્યયેશે લગ્નસંયુતે ।
ભૃગુપુત્રેણ સંયુક્તે ધર્મમૂલાદ્ધનવ્યયઃ ॥ ૧૪॥

---

### અથ ભાવેશફલાધ્યાયઃ ॥ ૨૪॥

લગ્નેશે લગ્નગે દેહસુખભાગ્ ભુજવિક્રમી ।
મનસ્વી ચઞ્ચલશ્ચૈવ દ્વિભાર્યો પરગોઽપિ વ ॥ ૧॥

લગ્નેશે ધનગે બાલો લાભવાન્ પણ્ડિતઃ સુખી ।
સુશીલો ધર્મવિન્માની બહુદારગુણૈર્યુતઃ ॥ ૨॥

લગ્નેશે સહજે જાતઃ સિંહતુલ્યપરાક્રમી ।
સર્વસમ્પદ્યુતો માની દ્વિભાર્યો મતિમાન્ સુખી ॥ ૩॥

લગ્નેશે સુખગે બાલઃ પિતૃમાતૃસુખાન્વિતઃ ।
બહુભ્રાતૃયુતઃ કામી ગુણરૂપસમન્વિતઃ ॥ ૪॥

લગ્નેશે સુતગે જન્તોઃ સુતસૌખ્યં ચ મધ્યમમ્ ।
પ્રથમાપત્યનાશઃ સ્યાન્માની ક્રોધી નૃપપ્રિયઃ ॥ ૫॥

લગ્નેશે ષષ્ઠગે જાતો દેહસૌખ્યવિવર્જિતઃ ।
પાપાઢ્યે શત્રુતઃ પીડા સૌમ્યદૃષ્ટિવિવર્જિતે ॥ ૬॥

લગ્નેશે સપ્તમે પાપે ભાર્યા તસ્ય ન જીવતિ ।
શુભેઽટનો દરિદ્રો વા વિરક્તો વા નૃપોઽપિ વા ॥ ૭॥

લગ્નેશેઽષ્ટમગે જાતઃ સિદ્ધવિદ્યાવિશારદઃ ।
રોગી ચૌરો મહાક્રોધી દ્યૂતી ચ પરદારગઃ ॥ ૮॥

લગ્નેશે ભાગ્યગે જાતો ભાગ્યવાઞ્જનવલ્લભઃ ।
વિષ્ણુભક્તઃ પટુર્વાગ્મી દારપુત્રધનૈર્યુતઃ ॥ ૯॥

લગ્નેશે દશમે જાતઃ પિતૃસૌખ્યસમન્વિતઃ ।
નૃપમાન્યો જને ખ્યાતઃ સ્વાર્જિતસ્વો ન સંશયઃ ॥ ૧૦॥

લગ્નેશે લાભગે જાતઃ સદા લાભસમન્વિતઃ ।
સુશીલઃ ખ્યાતકીર્તિશ્ચ બહુદારગુણૈર્યુતઃ ॥ ૧૧॥

લગ્નેશે વ્યયભાવસ્થે દેહસૌખ્યવિવર્જિતઃ ।
વ્યર્થવ્યયી મહાક્રોધી શુભદૃગ્યોગવર્જિતે ॥ ૧૨॥

ધનેશે લગ્નગે જાતઃ પુત્રવાન્ ધનસંયુતઃ ।
કુટુમ્બકણ્ટકઃ કામી નિષ્ઠુરઃ પરકાર્યકૃત્ ॥ ૧૩॥

ધનેશે ધનગે જાતો ધનવાન્ ગર્વસંયુતઃ ।
દ્વિભાર્યો બહુભાર્યો વા સુતહીનઃ પ્રજાયતે ॥ ૧૪॥

ધનેશે સહજે જાતો વિક્રમી મતિમાન્ ગુણી ।
કામી લોભી શુભાઢ્યે ચ પાપાઢ્યે દેવનિન્દકઃ ॥ ૧૫॥

ધનેશે સુખભાવસ્થે સર્વસમ્પતસમન્વિતઃ ।
ગુરુણા સંયુતે સ્વોચ્ચે રાજતુલ્યો નરો ભવેત્ ॥ ૧૬॥

ધનેશે સુતભાવસ્થે જાતો ધનસમન્વિતઃ ।
ધનોપાર્જનશીલાશ્ચ જાયન્તે તત્સુતા અપિ ॥ ૧૭॥

ધનેશે રિપુભાવસ્થે સશુભે શત્રુતો ધનમ્ ।
સપાપે શત્રુતો હાનિર્જંઘાવૈકલ્યવાન્ ભવેત્ ॥ ૧૮॥

ધનેશે સપ્તમે જાતઃ પરદારરતો ભિષેક્ ।
પાપેક્ષિતયુતે તસ્ય ભાર્યા ચ વ્યભિચારિણી ॥ ૧૯॥

ધનેશેઽષ્ટમગે જાતો ભૂરિભૂમિધનૈર્યુતઃ ।
પત્નીસુખં ભવેત્ સ્વલ્પં જ્યેષ્ઠભ્રાતૃસુખં ન હિ ॥ ૨૦॥

ધનેશે ધર્મભાવસ્થે ધનવાનુદ્યમી પટુઃ ।
બાલ્યે રોગી સુખી પશ્ચાત્ તીર્થધર્મવ્રતાદિકૃત્ ॥ ૨૧॥

ધનેશે કર્મગે જાતઃ કામી માની ચ પણ્ડિતઃ ।
બહુદાર્યધનૈર્યુક્તઃ કિઞ્ચ પુત્રસુખોજ્ઝિતઃ ॥ ૨૨॥

ધનેશે લાભભાવસ્થે સર્વલાભસમન્વિતઃ ।
સદોદ્યોગયુતો માની કીર્તિમાન્ જાયતે નરઃ ॥ ૨૩॥

ધનેશે વ્યયભાવસ્થે સાહમી ધનવર્જિતઃ ।
પરભાગ્યરતસ્તસ્ય જ્યેષ્ઠાપત્યસુખં નહિ ॥ ૨૪॥

લગ્નગે સહજાધીશે સ્વભુજાર્જિતવિત્તવાન્ ।
સેવાજ્ઞઃ સાહસી જાતો વિદ્યાહીનોઽપિ બુદ્ધિમાન્ ॥ ૨૫॥

દ્વિતીયે સહજાધીશે સ્થૂલો વિક્રમવર્જિતઃ ।
સ્વલ્પારમ્ભી સુખી ન સ્યાત્ પરસ્ત્રીધનકામુકઃ ॥ ૨૬॥

સહજે સહજાધીશે સહોદરસુખાન્વિતઃ ।
ધનપુત્રયુતો હૃષ્ટો ભુનક્તિ સુખમદ્ભુતમ્ ॥ ૨૭॥

સુખસ્થે સહજાધીશે સુખી ચ ધનસંયુતઃ ।
મતિમાન્ જાયતે બાલો દુષ્ટભાર્યાપતિશ્ચ સઃ ॥ ૨૮॥

સુતસ્થે સહજાધીશે પુત્રવાન્ ગુણસંયુતઃ ।

ભાર્યા તસ્ય ભવેત્ ક્રૂરા ક્રૂરગ્રહયુતેક્ષિતે ॥ ૨૯॥

ષષ્ઠભાવે ત્ર્તીયેશે ભ્રાતૃશત્રુર્મહાધની ।
માતુલૈશ્ચ સમં વૈરં માતુલાનીપ્રિયો નરઃ ॥ ૩૦॥

સપ્તમે સહજાધીશે રાજસેવાપરો નરઃ ।
બાલ્યે દુઃખી સુખી ચાન્તે જાયતે નાઽત્ર સંશયઃ ॥ ૩૧॥

અષ્ટમે સહજાધીશે જાતશ્ચૈરો નરો ભવેત્ ।
દાસવૃત્ત્યોપજીવી ચ રાજદ્વારે મૃતિર્ભવેત્ ॥ ૩૨॥

નવમે સહજાધીશે પિતુઃ સુખવિવર્જિતઃ ।
સ્ત્રીભિર્ભાગ્યોદયસ્તસ્ય પુત્રાદિસુખસંયુતઃ ॥ ૩૩॥

દશમે સહજાધીશે જાતઃ સર્વસુખાન્વિતઃ ।
સ્વભુજાર્જિવિત્તશ્ચ દુષ્ટસ્ત્રીભરણે રતઃ ॥ ૩૪॥

લાભગે સહજાધીશે વ્યાપારે લાભવાન્ સદા ।
વિદ્યાહીનોઽપિ મેધાવી સાહસી પરસેવકઃ ॥ ૩૫॥

વ્યયસ્થે સહજાધીશે કુતાર્યે વ્યયકૃજ્જનઃ ।
પિતા તસ્ય ભવેત્ ક્રૂરઃ સ્ત્રીભિર્ભાગ્યોદયસ્તથા ॥ ૩૬॥

સુખેશે ધનગે જાતો વિદ્યાગુણવિભૂષિતઃ ।
ભૂમીવાહનસંયુક્તો માતુઃ સુખસમન્વિતઃ ॥ ૩૭॥

સુખેશે ધનગે જાતો ભોગી સર્વધનાન્વિતઃ ।
કુટુમ્બસહિતો માની સાહસી કુહકાન્વિતઃ ॥ ૩૮॥

સુખેશે સહજે જાતો વિક્રમી ભૃત્યસંયુતઃ ।
ઉદારોઽરુગ્ ગુણી દાતા સ્વભુજાર્જિતવિત્તવાન્ ॥ ૩૯॥

સુખેશે સુખભાવસ્થે મન્ત્રી સર્વધનાન્વિતઃ ।
ચતુરઃ શીલવાન્ માની જ્ઞાનવાન્ સ્ત્રીપ્રિયઃ સુખી ॥ ૪૦॥

સુખેશે પુત્રભાવસ્થે સુખી સર્વજનપ્રિયઃ ।
વિષ્ણુભક્તો ગુણી માની સ્વભુજાર્જિતવિત્તવાન્ ॥ ૪૧॥

સુખેશે રિપુભાવસ્થે માતુઃ સુખવિવર્જિતઃ ।
ક્રોધી ચોરોઽભિચારી ચ સ્વેચ્છાચારશ્ચ દુર્મનાઃ ॥ ૪૨॥

સુખેશે સપ્તમે જાતો બહુવિદ્યાસમન્વિતઃ ।
પિત્રાર્જિતધનત્યાગી સભાયાં મૂકવદ્ ભવેત્ ॥ ૪૩॥

સુખેશે રન્ધ્રભાવસ્થે ગૃહાદિસુખવર્જિતઃ ।
પિત્રોઃ સુખં ભવેદલ્પં જાતઃ ક્લીબસમો ભવેત્ ॥ ૪૪॥

સુખેશે ભાગ્યભાવસ્થે જાતઃ સર્વજનપ્રિયઃ ।
દેવભક્તો ગુણી માની ભવેત્ સર્વસુખાન્વિતઃ ॥ ૪૫॥

સુખેશે કર્મભાવસ્થે રાજમાન્યો નરો ભવેત્ ।
રસાયની મહાહૃષ્ટો સુખભોગી જિતેન્દ્રિયઃ ॥ ૪૬॥

સુખેશે લાભગે જાતો ગુપ્તરોગભયાન્વિતઃ ।
ઉદારી ગુણવાન્ દાતા પરોપકરણે રતઃ ॥ ૪૭॥

સુખેશે વ્યયભાવસ્થે ગૃહાદિસુખવર્જિતઃ ।
જાતો દુર્વ્યસની મૂઢઃ સદાઽલસ્યસમન્વિતઃ ॥ ૪૮॥

સુતેશે લગ્નગે જાતો વિદ્યાન્ પુત્રસુખાન્વિતઃ ।
કદર્યો વક્રચિત્તશ્ચ પરદ્રવ્યાપહારકઃ ॥ ૪૯॥

સુતેશે ધનગે જાતો બહુપુત્રો ધનાન્વિતઃ ।
કુટુમ્બપોષકો માની સ્ત્રીપ્રિયઃ સુયશા ભુવિ ॥ ૫૦॥

સુતેશે સહજે ભાવે જાયતે સોદરપ્રિયઃ ।
પિશુનશ્ચ કદર્યશ્ચ સ્વકાર્યનિરતઃ સદા ॥ ૫૧॥

સુતેશે સુખભાવસ્થે સુખી માતૃસુખાન્વિતઃ ।
લક્ષ્મીયુક્તઃ સુબુદ્ધિશ્ચ રાજ્ઞોઽમાત્યોઽથવા ગુરુઃ ॥ ૫૨॥

સુતેશે સુતભાવસ્તે શુભાઢ્યે પુત્રવાન્ નરઃ ।
પાપાઢ્યેઽપત્યહીનોઽસૌ ગુણવાન્ મિત્રવત્સલઃ ॥ ૫૩॥

સુતેશે રિપુભાવસ્થે પુત્રઃ શત્રુસમો ભવેત્ ।
મૃતાપત્યોઽથવા જાતો દત્તક્રીતસુતોઽથવા ॥ ૫૪॥

સુતેશે સપ્તમે માની સર્વધર્મસમન્વિતઃ ।
પુત્રાદિસુખયુક્તશ્ચ પરોપકરણે રતઃ ॥ ૫૫॥

સુતેશે રન્ધ્રભાવસ્થે સ્વલ્પપુત્રસુખાન્વિતઃ ।
કાસશ્વાસસમાયુક્તઃ ક્રોધી ચ સુખવર્જિતઃ ॥ ૫૬॥

સુતેશે ભાગ્યગે પુત્રો ભપો વા તત્સમો ભવેત્ ।
સ્વયં વા ગ્રન્થકર્તા ચ વિખ્યાતઃ કુલદીપકઃ ॥ ૫૭॥

સુતેશે રાજ્યભાવસ્થે રાજયોગો હિ જાયતે ।
અનેકસુખભોગી ચ ખ્યાતકીર્તિર્નરો ભવેત્ ॥ ૫૮॥

સુતેશે લાભગે જાતો વિદ્યાવાન્ જનવલ્લભઃ ।
ગ્રન્થકર્તા મહાદક્ષો બહુપુત્રધનાન્વિતઃ ॥ ૫૯॥

સુતેશે વ્યયભાવસ્થે જાતઃ પુત્રસુખોજ્ઝિતઃ ।
દત્તપુત્રયુતો વાઽસૌ ક્રીતપુત્રાન્વિતોઽથવા ॥ ૬૦॥

ષષ્ઠેશે લગ્નગે જાતો રોગવાન્ કીર્તિસંયુતઃ ।
આત્મશત્રુર્ધની માની સાહસી ગુણવાન્ નરઃ ॥ ૬૧॥

ષષ્ઠેશે ધનભાવસ્થે સાહસી કુલવિશ્રુતઃ ।
પરદેશી સુખી વક્તા સ્વકર્મનીરતઃ સદા ॥ ૬૨॥

ષષ્ઠેશે સહજઃ જાતઃ ક્રોધી વિક્રમવર્જિતઃ ।
ભ્રાતા શત્રુસમસ્તસ્ય ભૃત્યશ્ચોત્તરદાયકઃ ॥ ૬૩॥

ષષ્ઠેશે સુખભાવસ્થે માતુઃ સુખવિવર્જિતઃ ।
મનસ્વી પિશુના દ્વેષી ચલચિત્તોઽતિવિત્તવાન્ ॥ ૬૪॥

ષષ્ઠેશે સુતગો યસ્ય ચલં તસ્ય ધનાદિકમ્ ।
શત્રુતા પુત્રમિત્રૈશ્ચ સુખી સ્વાર્થી દયાન્વિતઃ ॥ ૬૫॥

ષષ્ઠેશે રિપુભાવસ્થે વૈરં સ્વજ્ઞાતિમણ્ડલાત્ ।
અન્યૈઃ સહ ભવેન્ મૈત્રી સુખં મધ્યં ધનાદિજમ્ ॥ ૬૬॥

ષષ્ઠેશે દારભાવસ્થે જાતો દારસુખોજ્ઝિતઃ ।
કીર્તિમાન્ ગુણવાન્ માની સાહસી ધનસંયુતઃ ॥ ૬૭॥

ષષ્ઠેશેઽષ્ટમગે જાતો રોગી શત્રુર્મનીષિણામ્ ।
પરદ્રવ્યાભિલાષી ચ પરદારરતોઽશુચિઃ ॥ ૬૮॥

ષષ્ઠેશે ભાગ્યગે જાતઃ કાષ્ઠપાષાણવિક્રયી ।
વ્યવહારે ક્વચિદ્ધાનિઃ ક્વચિદ્વૃદ્ધિશ્ચ જાયતે ॥ ૬૯॥

ષષ્ઠેશે દશમે ભાવે માનવઃ કુલવિશ્રુતઃ ।

અભક્તશ્ચ પિતુર્વક્તા વિદેશે ચ સુખી ભવેત્ ॥ ૭૦॥

ષષ્ઠેશે લાભગે જાતઃ શત્રુતો ધનમાપ્નુયાત્ ।
ગુણવાન્ સાહસી માની કિન્તુ પુત્રસુખોજ્ઝિતઃ ॥ ૭૧॥

ષષ્ઠેશે વ્યયભાવસ્થે વ્યસને વ્યયકૃત્ સદા ।
વિદ્વદ્દ્વેષી ભવેજ્જાતો જીવહિંસાસુ તત્પરઃ ॥ ૭૨॥

દારેશે લગ્નગે જાતઃ પરદારેષુ લમ્પટઃ ।
દુષ્ટો વિચક્ષણોઽધીરો જનો વાતરુજાન્વિતઃ ॥ ૭૩॥

દારેશે ધનગે જાતો બહુસ્ત્રીભિઃ સમન્વિતઃ ।
દારયોગાદ્ધનાપ્તિશ્ચ દીર્ઘસૂત્રી ચ માનવઃ ॥ ૭૪॥

દારેશે સહજે જાતો મૃતાપત્યો હિ માનવઃ ।
કદાચિજ્જાયતે પુત્રી યત્નાત્ પુત્રોઽપિ જીવતિ ॥ ૭૫॥

દારેશે સુખભાવસ્થે જાયા નાસ્ય વશે સદા ।
સ્વયં સત્યપ્રિયો ધીમાન્ ધર્માત્મા દન્તરોગયુક્ ॥ ૭૬॥

દારેશે પઞ્ચમે જાતો માનિ સર્વગુણાન્વિતઃ ।
સર્વદા હર્ષયુક્તશ્ચ તથા સર્વધનાધિપઃ ॥ ૭૭॥

દારેશે રિપુભાવસ્થે ભાર્યા તસ્ય રુજાન્વિતા ।
સ્ત્રિયા સહાઽથ વા વૈરં સ્વયં ક્રોધી સુખોજ્ઝિતઃ ॥ ૭૮॥

દારેશે સપ્તમે ભાવે જાતો દારસુખાન્વિતઃ ।
ધીરો વિચક્ષણો ધીમાન્ કેવલં વાતરોગવાન્ ॥ ૭૯॥

દારેશે મૃત્યુભાવસ્થે જાતો દારસુખોજ્ઝિતઃ ।
ભાર્યાઽપિ રોગયુક્તાઽસ્ય દુઃશીલાઽપિ ન ચાનુગા ॥ ૮૦॥

દારેશે ધર્મભાવસ્થે નાનાસ્ત્રીભિઃ સમાગમઃ ।
જાયાહૃતમના જાતો બહ્વારમ્ભકરો નરઃ ॥ ૮૧॥

દારેશે કર્મભાવસ્થે નાસ્ય જાયા વશાનુગા ।
સ્વયં ધર્મરતો જાતો ધનપુત્રાદિસંયુતઃ ॥ ૮૨॥

દારેશે લાભભાવસ્થે દારૈરર્થસમાગમઃ ।
પુત્રાદિસુખમલ્પં ચ જનઃ કન્યપ્રજો ભવેત્ ॥ ૮૩॥

દારેશે વ્યયગે જાતો દરિદ્રઃ કૃપણોઽપિ વા ।
ભાર્યા;પિ વ્યયશીલાઽસ્ય વસ્ત્રાજીવી નરો ભવેત્ ॥ ૮૪॥

અષ્ટમેશે તનૌ જાતસ્તનુસૌખ્યવિવર્જિતઃ ।
દેવાનાં બ્રાહ્મણાનાં ચ નિન્દકો વ્રણસંયુતઃ ॥ ૮૫॥

અષ્ટમેશે ધને બાહુબલહીનઃ પ્રજાયતે ।
ધનં તસ્ય ભવેત્ સ્વલ્પં નષ્ટ વિત્તં ન લભ્યતે ॥ ૮૬॥

રન્ધ્રેશે સહજે ભાવે ભ્રાતૃસૌખ્યં ન જાયતે ।
સાલસ્યો ભૃત્યહીનશ્ચ જાયતે બલવર્જિતઃ ॥ ૮૭॥

રન્ધ્રેશે સુખભાવસ્થે માતૃહીનો ભવેચ્છિશુઃ ।
ગૃહભૂમિસુખૈર્હીનો મિત્રદ્રોહી ન સંશયઃ ॥ ૮૮॥

રન્ધ્રેશે સુતભાવસ્થે જડબુદ્ધિઃ પ્રજાયતે ।
સ્વલ્પપ્રજ્ઞો ભવેજ્જતો દીર્ઘાયુશ્ચ ધનાન્વિતઃ ॥ ૮૯॥

રન્ધ્રેશે રિપુભાવસ્થે શત્રુજેતા ભવેજ્જનઃ ।
રોગયુક્તશરીરશ્ચ બાલ્યે સર્પજલાદ્ ભયમ્ ॥ ૯૦॥

રન્ધ્રેશે દારભાવસ્થે તસ્ય ભાર્યાદ્વયં ભવેત્ ।
વ્યાપારે ચ ભવેધાનિસ્તસ્મિન્ પાપયુતે ધ્રુવમ્ ॥ ૯૧॥

રન્ધ્રેશે મૃત્યુભાવસ્થે જાતા દીર્ઘાયુષા યુતઃ ।
નિર્બલે મધ્યમાયુઃ સ્યાચ્ચૌરો નિન્દ્યોઽન્યનિન્દકઃ ॥ ૯૨॥

અષ્ટમેશે તપઃસ્થાને ધર્મદ્રોહી ચ નાસ્તિકઃ ।
દુષ્ટભાર્યાપતિશ્ચૈવ પરદ્રવ્યાપહારકઃ ॥ ૯૩॥

રન્ધ્રેશે કર્મભાવસ્તે પિતૃસૌખ્યવિવર્જિતઃ ।
પિશુનઃ કર્મહીનશ્ચ યદિ નૈવ શુભેક્ષિતે ॥ ૯૪॥

રન્ધ્રેશે લાભભાવસ્થે સપાપે ધનવર્જિતઃ ।
બાલ્યે દુઃખી સુખી પશ્ચાત્ દીર્ઘાયુશ્ચ શુભાન્વિતે ॥ ૯૫॥

રન્ધ્રેશે વ્યયભાવસ્થે કુકાર્યે વ્યયકૃત્ સદા ।
અલ્પાયુશ્ચ ભવેજ્જાતઃ સપાપે ચ વિશેષતઃ ॥ ૯૬॥

ભાગ્યેશે લગ્નગે જાતો ભાગ્યવાન્ ભૂપવન્દિતઃ ।
સુશીલશ્ચ સુરૂપશ્ચ વિદ્યાવાન્ જનપૂજિતઃ ॥ ૯૭॥

ભાગ્યેશે ધનભાવસ્થે પણ્ડિતો જનવલ્લભઃ ।
જાયતે ધનવાન્ કામી સ્ત્રીપુત્રાદિસુખાન્વિતઃ ॥ ૯૮॥

ભાગ્યેશે ભ્રાતૃભાવસ્થે જાતો ભ્રાતૃસુખાન્વિતઃ ।
ધનવાન્ ગુણવાંશ્ચાપિ રૂપશીલસમન્વિતઃ ॥ ૯૯॥

ભાગ્યેશે તુર્યભાવસ્થે ગૃહયાનસુખાન્વિતઃ ।
સર્વસમ્પત્તિયુક્તશ્ચ માતૃભક્તો ભવેન્નરઃ ॥ ૧૦૦॥

ભાગ્યેશે સુતભાવસ્થે સુતભાગ્યસમન્વિતઃ ।
ગુરુભક્તિરતો ધીરો ધર્માત્મા પણ્ડિતો નરઃ ॥ ૧૦૧॥

ભાગ્યેશે રિપુભાવસ્થે સ્વલ્પભાગ્યો ભવેન્નરઃ ।
માતુલાદિસુખૈર્હીનઃ શત્રુભિઃ પીડિતઃ સદા ॥ ૧૦૨॥

ભાગ્યેશે દારભાવસ્થે દારયોગાત્ સુખોદયઃ ।
ગુણવાન્ કીર્તિમાંશ્ચાપિ જાયતે દ્વિજસત્તમઃ ॥ ૧૦૩॥

ભાગ્યેશે મૃત્યુભાવસ્થે ભાગ્યહીનો નરો ભવેત્ ।
જ્યેષ્ઠભ્રાતૃસુખં નૈવ તસ્ય જાતસ્ય જાયતે ॥ ૧૦૪॥

ભાગ્યેશે ભાગ્યભાવસ્થે બહુભાગ્યસમન્વિતઃ ।
ગુણસૌન્દર્યસમ્પન્નો સહજેભ્યઃ સુખં બહુ ॥ ૧૦૫॥

ભાગ્યેશે કર્મભાવસ્થે જાતો રાજાઽથ તત્સમઃ ।
મન્ત્રી સેનાપતિર્વાઽપિ ગુણવાન્ જનપુજિતઃ ॥ ૧૦૬॥

ભાગ્યેશે લાભભાવસ્થે ધનલાભો દિને દિને ।
ભક્તો ગુરુજનાનાં ચ ગુણવાન્ પુણ્યવાનપિ ॥ ૧૦૭॥

ભાગ્યેશો વ્યયભાવસ્થો ભાગ્યહાનિકરો નૃણામ્ ।
શુભકાર્યે વ્યયો નિત્યં નિર્ધનોઽતિથિસઙ્ગમાત્ ॥ ૧૦૮॥

કર્મેશે લગ્નગે જાતો વિદ્વાન્ ખ્યાતો ધની કવીઃ ।
બાલ્યે રોગી સુખી પશ્ચાદ્ ધનવૃદ્ધિર્દિને દિને ॥ ૧૦૯॥

રાજ્યેશે ધનભાવસ્થે ધનવાન્ ગુણસંયુતઃ ।
રાજમાન્યો વદાન્યશ્ચ પિત્રાદિસુખસંયુતઃ ॥ ૧૧૦॥

કર્મેશે સહજે જાતો ભ્રાતૃભૃત્યસુખાન્વિતઃ ।

વિક્રમી ગુણસમ્પન્નઃ વાગ્મી સત્યરતો નરઃ ॥ ૧૧૧॥

કર્મેશે સુખભાવસ્થે સુખી માતૃહિતે રતઃ ।
યાનભૂમિગૃહાધીશો ગુણવાન્ ધનવાનપિ ॥ ૧૧૨॥

કર્મેશે સુતભાવસ્થે સર્વવિદ્યાસમન્વિતઃ ।
સર્વદા હૃર્ષસંયુક્તો ધનવાન્ પુત્રવાનપિ ॥ ૧૧૩॥

કર્મેશે રિપુભાવસ્થે પિતૃસૌખ્યવિવર્જિતઃ ।
ચતુરોઽપિ ધનૈર્હીનઃ શત્રુભિઃ પરિપીડિતઃ ॥ ૧૧૪॥

રાજ્યેશે દારભાવસ્થે જાતો દારસુખાન્વિતઃ ।
મનસ્વી ગુણવાન્ વાગ્મી સત્યધર્મરતઃ સદા ॥ ૧૧૫॥

કર્મેશે રન્ધ્રભાવસ્થે કર્મહીનો ભવેન્નરઃ ।
દીર્ઘાયુરપ્યસૌ જાતઃ પરનિન્દાપરાયણઃ ॥ ૧૧૬॥

રાજ્યેશે ભાગ્યભે જાતો રાજા રાજકુલોદ્ભવઃ ।
તત્સમોઽન્યકુલોત્પન્નો ધનપુત્રાદિસંયુતઃ ॥ ૧૧૭॥

કર્મેશે રાજ્યભાવસ્થે સર્વકર્મપટુઃ સુખી ।
વિક્રમી સત્યવક્તા ચ ગુરુભક્તિરતો નરઃ ॥ ૧૧૮॥

રાજ્યેશે લાભભાવસ્થે જાતો ધનસુતાન્વિતઃ ।
હર્ષવાન્ ગુણવાંશ્ચાપિ સત્યવક્તા સદા સુખી ॥ ૧૧૯॥

રાજ્યેશે વ્યયભાવસ્થે તસ્ય રાજગૃહે વ્યયઃ ।
શત્રુતોઽપિ ભયં નિત્યં ચતુરશ્ચાપિ ચિન્તિતઃ ॥ ૧૨૦॥

લાભેશે લગ્નગે જાતઃ સાત્ત્વિકો ધનવાન્ સુખી ।
સમદૃષ્ટિઃ કવિર્વાગ્મી સદા લાભસમન્વિતઃ ॥ ૧૨૧॥

લાભેશે ધનભાવસ્થે જાતઃ સર્વધનાન્વિતઃ ।
સર્વસિદ્ધિયુતો દાતા ધાર્મિકશ્ચ સુખી સદા ॥ ૧૨૨॥

લાભેશે સહજે જાતઃ કુશલઃ સર્વકર્મસુ ।
ધની ભ્રાતૃસુખોપેતઃ શૂલરોગભયં ક્વચિત્ ॥ ૧૨૩॥

લાભેશે સુખભાવસ્થે લાભો માતૃકુલાદ્ ભવેત્ ।
તીર્થયાત્રાકરો જાતો ગૃહભૂમિસુખાન્વિતઃ ॥ ૧૨૪॥

લાભેશે સુતભાવસ્થે ભવન્તિ સુખિનઃ સુતાઃ ।
વિદ્યવન્તોऽપિ સચ્છીલાઃ સ્વયં ધર્મરતઃ સુખી ॥ ૧૨૫॥

લાભેશે રોગભાવસ્થે જાતો રોગસમન્વિતઃ ।
ક્રૂરબુદ્ધિઃ પ્રવાસી ચ શત્રુભિ પરિપીડિતઃ ॥ ૧૨૬॥

લાભેશે દારભાવસ્થે લાભો દારકુલાત્ સદા ।
ઉદારશ્ચ ગુણી કામી જનો ભાર્યાવશાનુગઃ ॥ ૧૨૭॥

લાભેશે રન્ધ્રભાવસ્થે હાનિઃ કાર્યેષુ જાયતે ।
તસ્યાયુશ્ચ ભવેદ્દીર્ઘં પ્રથમં મરણં સ્ત્રિયઃ ॥ ૧૨૮॥

લભેશે ભાગ્યભાવસ્થે ભાગ્યવાન્ જાયતે નરઃ ।
ચતુરઃ સત્યવાદી ચ રાજપુજ્યો ધનાધિપઃ ॥ ૧૨૯॥

લાભેશે કર્મભાવસ્થે ભૂપવન્દ્યો ગુણાન્વિતઃ ।
નિજધર્મરતો ધીમાન્ સત્યવાદી જિતેન્દ્રિયઃ ॥ ૧૩૦॥

લાભેશે લાભભાવસ્થે લાભઃ સર્વેષુ કર્મસુ ।
પણ્ડિત્યં ચ સુખં તસ્ય વર્દ્ધતે ચ દિને દિને ॥ ૧૩૧॥

લાભેશે વ્યયભાવસ્થે સત્કાર્યેષુ વ્યયઃ સદા ।
કામુકો બહુપત્નીકો મ્લેચ્છસંસર્ગકારકઃ ॥ ૧૩૨॥

વ્યયેશે લગ્નગે જાતો વ્યયશીલો જતો ભવેત્ ।
દુર્બલઃ કફરોગી ચ ધનવિદ્યાવિવર્જિતઃ ॥ ૧૩૩॥

વ્યયેશે ધનભાવસ્થે શુભકાર્યે વ્યયઃ સદા ।
ધાર્મિકઃ પ્રિયવાદી ચ ગુણસૌખ્યસમન્વિતઃ ॥ ૧૩૪॥

વ્યયેશે સહજે જાતો ભ્રાતૃસૌક્ખ્યવિવર્જિતઃ ।
ભવેદન્યજનદ્વેષી સ્વશરીરસ્ય પોષકઃ ॥ ૧૩૫॥

વ્યયેશે સુખભાવસ્થે માતુઃ સુખવિવર્જિતઃ ।
ભૂમિયાનગૃહાદીનાં હાનિસ્તસ્ય દિનેદિને ॥ ૧૩૬॥

વ્યયેશે સુતભાવસ્થે સુતવિદ્યાવિવર્જિતઃ ।
પુત્રાર્થે ચ વ્યયસ્તસ્ય તીર્થાટનપરો નરઃ ॥ ૧૩૭॥

વ્યયેશે રિપુભાવસ્થે જાતઃ સ્વજનવૈરકૃત્ ।
ક્રોધી પાપી ચ દુઃખી ચ પરજાયારતો નરઃ ॥ ૧૩૮॥

વ્યયેશે દારભાવસ્થે વ્યયો દારકૃતઃ સદા ।
તસ્ય ભાર્યાસુખં નૈવ બલવિદ્યાવિવર્જિતઃ ॥ ૧૩૯॥

વ્યયેશે મૃત્યુભાવસ્થે જાતો લાભાન્વિતઃ સદા ।
પ્રિયવાઙ્ મધ્યમાયુશ્ચ સમ્પૂર્ણગુણસંયુતઃ ॥ ૧૪૦॥

વ્યયેશે ભાગ્યભાવસ્થે ગુરુદ્વેષી ભવેન્નરઃ ।
મિત્રૈરપિ ભવેદ્વૈરં સ્વાર્થસાધનતત્પરઃ ॥ ૧૪૧॥

વ્યયેશે રાજ્યભાવસ્થે વ્યયો રાજકુલાદ્ભવેત્ ।
પિતૃતોऽપિ સુખં તસ્ય સ્વલ્પમેવ હિ જાયતે ॥ ૧૪૨॥

વ્યયેશે લાભભાવસ્થે લાભે હાનિઃ પ્રજાયતે ।
પરેણ રક્ષિતં દ્રવ્યં કદાચિલ્લભતે નરઃ ॥ ૧૪૩॥

વ્યયેશે વ્યયભાવસ્થે વ્યયાધિક્યં હિ જાયતે ।
ન શરીરસુખં તસ્ય ક્રોધી દ્વેષપરો નૃણામ્ ॥ ૧૪૪॥

ઇતિ તે કથિતં વિપ્ર ભાવેશાનાં ચ યત્ ફલમ્ ।
બલાબલવિવેકેન સર્વેષં તત્સમાદિશેત્ ॥ ૧૪૫॥

દ્વિરાશીશસ્ય ખેટસ્ય વિદિત્વોભયથા ફલમ્ ।
વિરોધે તુલ્યફલયોર્દ્વયોર્નાશઃ પ્રજાયતે ॥ ૧૪૬॥

વિભિન્નયોસ્તુ ફલયોર્દ્વયોઃ પ્રાપ્તિર્ભવેદ્ધ્રુવમ્ ।
ગ્રહે પૂર્ણબલે પુર્ણમર્ધમર્ધબલે ફલમ્ ॥ ૧૪૭॥

પાદં હીનબલે ખેટે જ્ઞેયમિત્થં બુધૈરિતિ ।
ઉક્તં ભાવસ્થિતાનાં તે ભાવેશાનાં પલં મયા ॥ ૧૪૮॥

---

## અથાऽપ્રકાશગ્રહફલાધ્યાયઃ ॥ ૨૫॥

રવ્યાદિસપ્તખેટાનાં પ્રોક્તં ભાવફલં મયા ।
અપ્રકાશગ્રહાણાં ચ ફલાનિ કથયામ્યહમ્ ॥ ૧॥

શૂરો વિમલનેત્રાંશઃ સુસ્તબ્ધો નિર્ઘૃણઃ ખલઃ ।
મૂર્તિસ્થે ધૂમસંજ્ઞે ચ ગાઢરોષો નરઃ સદા ॥ ૨॥

રોગી ધની તુ હીનાઙ્ગો રાજ્યાપહૃતમાનસઃ ।

ધૂમે દ્વિતીયે સમ્પ્રાપ્તે મન્દપ્રજ્ઞો નપુંસકઃ ॥ ૩॥

મતિમાન્ શૌર્યસમ્પન્ન ઇષ્ટચિતઃ પ્રિયંવદઃ ।
ધૂમે સહજભાવસ્થે જનાઢ્યો ધનવાન્ ભવેત્ ॥ ૪॥

કલત્રાઙ્ગપરિત્યક્તો નિત્યં મનસિ દુઃખિતઃ ।
ધૂમે ચતુર્થે સમ્પ્રાપ્તે સર્વશાસ્ત્રાર્થચિન્તકઃ ॥ ૫॥

સ્વલ્પાપત્યો ધનૈર્હીનો ધૂમે પઞ્ચમસંસ્થિતે ।
ગુરુત સર્વભક્ષં ચ સુહૃન્મન્ત્રવિવર્જિતઃ ॥ ૬॥

બલવાઞ્છત્રુવધકો ધૂમે ચ રિપુભાવગે ।
બહુતેજોયુતઃ ખ્યાતઃ સદા રોગવિવર્જિતઃ ॥ ૭॥

નિર્ધનઃ સતતં કામી પરદારેષુ કોવિદઃ ।
ધૂમે સપ્તમગે જાતો નિસ્તેજાઃ સર્વદા ભવેત્ ॥ ૮॥

વિક્રમેણ પરિત્યક્તઃ સોત્સાહો સત્યસઙ્ગરઃ ।
અપ્રિયો નિષ્ઠુરઃ સ્વાર્થી ધૂમે મૃત્યુગતે સતિ ॥ ૯॥

સુતસૌભાગ્યસમ્પન્નો ધની માની દયાન્વિતઃ ।
ધર્મસ્થાને સ્થિતે ધૂમે ધર્મવાન્ બન્ધુવત્સલઃ ॥ ૧૦॥

સુતસૌભાગ્યસંયુક્તઃ સન્તોષી મતિમાન્ સુખી ।
કર્મસ્થે માનવો નિત્યં ધૂમે સત્યપદસ્થિતઃ ॥ ૧૧॥

ધનધાન્યહિરણ્યાઢ્યો રૂપવાંશ્ચ કલાન્વિતઃ ।
ધૂમે લાભગતે ચૈવ વિનીતો ગીતકોવિદઃ ॥ ૧૨॥

પતિતઃ પાપકર્મા ચ ધૂમે દ્વાદશસઙ્ગતે ।
પરદારેષુ સંસક્તો વ્યસની નિર્ઘૃણઃ શઠઃ ॥ ૧૩॥

લગ્ને પાતે ચ સમ્પ્રાપ્તે જાતકો દુઃખીપીડિતઃ ।
ક્રૂરો ઘાતકરો મૂર્ખો દ્વેષી બન્ધુજનસ્ય ચ ॥ ૧૪॥

જિહ્મોઽતિપિત્તવાન્ ભોગી ધનસ્થે પાતસંજ્ઞકે ।
નિર્ઘૃણશ્ચાઽકૃતજ્ઞશ્ચ દુષ્ટાત્મા પાપકૃત્તથા ॥ ૧૫॥

સ્થિરપ્રજ્ઞો રણી દાતા ધનાઢ્યો રાજવલ્લભઃ ।
સમ્પ્રાપ્તે સહજે પાતે સેનાધીશો ભવેન્નરઃ॥ ૧૬॥

બન્ધવ્યાધિસમાયુક્તઃ સુતસૌભાગ્યવર્જિતઃ ।
ચતુર્થગો યદા પાતસ્તદા સ્યાન્મનુજશ્ચ સઃ ॥ ૧૭॥

દરિદ્રો રૂપસંયુક્તઃ પાતે પઞ્ચમગે સતિ ।
કફપિત્તાનિલૈર્યુક્તો નિષ્ઠુરો નિરપત્રપઃ ॥ ૧૮॥

શત્રુહન્તા સુપુષ્ટશ્ચ સર્વાસ્ત્રાણાં ચ ચાલકઃ ।
કલાસુ નિપુણઃ શાન્તઃ પાતે શત્રુગતે સતિ ॥ ૧૯॥

ધનદારસુતૈસ્ત્યક્તઃ સ્ત્રીજિતો દુઃખસંયુતઃ ।
પાતે કલત્રગે કામી નિર્લજ્જઃ પરસૌહૃદઃ ॥ ૨૦॥

વિકલાક્ષો વિરૂપશ્ચ દુર્ભગો દ્વિજનિન્દકઃ ।
મૃત્યુસ્થાને સ્થિતે પાતે રક્તપીડાપરિપ્લુતઃ ॥ ૨૧॥

બહુવ્યાપારકો નિત્યં બહુમિત્રો બહુશ્રુતઃ ।
ધર્મભે પાતખેટે ચ સ્ત્રીપ્રિયશ્ચ પ્રિયંવદઃ ॥ ૨૨॥

સશ્રીકો ધર્મકૃચ્છાન્તો ધર્મકાર્યેષુ કોવિદઃ ।
કર્મસ્થે પાતસંજ્ઞે હિ મહાપ્રાજ્ઞો વિચક્ષણઃ ॥ ૨૩॥

પ્રભૂતધનવાન્ માની સત્યવાદી દૃઢવ્રતઃ ।
અશ્વાઢ્યો ગીતસંસક્તઃ પાતે લાભગતે સતિ ॥ ૨૪॥

કોપી ચ બહુકર્માઢ્યો વ્યંગો ધર્મસ્ય દૂષકઃ ।
વ્યયસ્થાને ગતે પાતે વિદ્વેષી નિજબન્ધુષુ ॥ ૨૫॥

વિદ્વાન્ સત્યરતઃ શાન્તો ધનવાન્ પુત્રવાઞ્છુચિઃ ।
પરિધો તનુગે દાતા જાયતે ગુરુવત્સલઃ ॥ ૨૬॥

ઈશ્વરો રૂપવાન્ ભોગી સુખી ધર્મપરાયણઃ ।
ધનસ્થે પરિધૌ જાતઃ પ્રભુર્ભવતિ માનવઃ ॥ ૨૭॥

સ્ત્રીવલ્લભઃ સુરૂપાંગો દેવસ્વજનસંગતઃ ।
તૃતીયે પરિધૌ ભૃત્યો ગુરુભક્તિસમન્વિતઃ ॥ ૨૮॥

પરિધૌ સુખભાવસ્થે વિસ્મિતં ત્વરિમંગલમ્ ।
અક્રૂરં ત્વથ સમ્પૂર્ણં કુરુતે ગીતકોવિદમ્ ॥ ૨૯॥

લક્ષ્મીવાન્ શીલવાન્ કાન્તઃ પ્રિયવાન્ ધર્મવત્સલઃ ।
પઞ્ચમે પરિધૌ જાતઃ સ્ત્રીણાં ભવતિ વલ્લભઃ ॥ ૩૦॥

વ્યક્તોઽર્થપુત્રવાન્ ભોગી સર્વસત્ત્વહિતે રતઃ ।
પરિધૌ રિપુભાવસ્થે શત્રુહા જાયતે નરઃ ॥ ૩૧॥

સ્વલ્પાપત્યઃ સુખૈર્હીનો મન્દપ્રજ્ઞઃ સુનિષ્ઠુરઃ ।
પરિધૌ દ્યૂનભાવસ્થે સ્ત્રીણાં વ્યાધિશ્ચ જાયતે ॥ ૩૨॥

અધ્યાત્મચિન્તકઃ શાન્તો દૃઢકાયો દૃઢવ્રતઃ ।
ધર્મવાંશ્ચ સસત્ત્વશ્ચ પરિધૌ રન્ધ્રસંસ્થિતે ॥ ૩૩॥

પુત્રાન્વિતઃ સુખી કાન્તો ધનાઢયો લૌલ્યવર્જિતઃ ।
પરિધૌ ધર્મગે માની સ્વલ્પસન્તુષ્ટમાનસઃ ॥ ૩૪॥

કલાભિજ્ઞસ્તથા ભોગી દૃઢકાયો હ્યમત્સરઃ ।
પરિધૌ દશમે પ્રાપ્તે સર્વશાસ્ત્રાર્થપારગઃ ॥ ૩૫॥

સ્ત્રીભોગી ગુણવાંશ્ચૈવ મતિમાન્ સ્વજનપ્રિયઃ ।
લાભગે પરિધૌ જાતો મન્દાગ્નિરુપપદ્યતે ॥ ૩૬॥

વ્યયસ્તે પરિધૌ જાતો વ્યયકૃત્ માનવઃ સદા ।
દુઃખભાગ્ દુષ્ટબુદ્ધિશ્ચ ગુરુનિન્દાપરાયણઃ ॥ ૩૭॥

ધનધાન્યહિરણ્યાઢ્યઃ કૃતજ્ઞઃ સમ્મતઃ સતામ્ ।
સર્વદોષપરિત્યક્તશ્ચાપે તનુગતે નરઃ ॥ ૩૮॥

પ્રિયંવદઃ પ્રગલ્ભાઢ્યો વિનીતો વિદ્યયાઽન્વિતઃ ।
ધનસ્થે ચાપખેટે ચ રૂપવાન્ ધર્મતત્પરઃ ॥ ૩૯॥

કૃપણોઽતિકલાભિજ્ઞશ્ચૌર્યકર્મરતઃ સદા ।
સહજે ધનુષિ પ્રાપ્તે હીનાઙ્ગો ગતસૌહૃદઃ ॥ ૪૦॥

સુખી ગોધનધાન્યાદ્યૈ રાજસન્માનપૂજિતઃ ।
કાર્મુકે સુખસંસ્થે તુ નીરોગો તનુ જાયતે ॥ ૪૧॥

રુચિમાન્ દીર્ઘદર્શી ચ દેવભક્તઃ પ્રિયંવદઃ ।
ચાપે પઞ્ચમગે જાતો વિવૃદ્ધઃ સર્વકર્મસુ ॥ ૪૨॥

શત્રુહન્તાઽતિધર્તશ્ચ સુખી પ્રીતિરુચિઃ શુચિઃ ।
ષષ્ઠસ્થાનગતે ચાપે સર્વકર્મસમૃદ્ધિભાક્ ॥ ૪૩॥

ઈશ્વરો ગુણસમ્પૂર્ણઃ શાસ્ત્રવિદ્ધાર્મિકઃ પ્રિયઃ ।

ચાપે સપ્તમભાવસ્થે ભવતીતિ ન સંશયઃ ॥ ૪૪॥

પરકર્મરતઃ ક્રૂરઃ પરદારપરાયણઃ ।
અષ્ટમસ્થાનગતે ચાપે જાયતે વિકલાંગકઃ ॥ ૪૫॥

તપસ્વી વ્રતચર્યાસુ નિરતો વિદ્યયાઽધિકઃ ।
ધર્મસ્થે જાયતે ચાપે માનવો લોકવિશ્રુતઃ ॥ ૪૬॥

બહુપુત્રધનૈશ્વર્યો ગોમહિષ્યાદિમાન્ ભવેત્ ।
કર્મભે ચાપસંયુક્તે જાયતે લોકવિશ્રુતઃ ॥ ૪૭॥

લાભગે ચપખેટે ચ લાભયુક્તો ભવેન્નરઃ ।
નિરોગો દૃઢકોપાગ્નિર્મન્ત્રસ્ત્રીપરમાસ્ત્રવિત્ ॥ ૪૮॥

ખલોઽતિમાની દુર્બુદ્ધિર્નિર્લજ્જો વ્યયસંસ્થિતે ।
ચાપે પરસ્ત્રીસંયુક્તો જાયતે નિર્ધનઃ સદા ॥ ૪૯॥

કુશલઃ સર્વવિદ્યાસુ સુખી વાઙ્નિપુનઃ પ્રિયઃ ।
તનૌ શિખિનિ સઞ્જાતઃ સર્વકામાન્વિતો ભવેત્ ॥ ૫૦॥

વક્તા પ્રિયંવદઃ કાન્તો ધનસ્થાનગતે ધ્વજે ।
કાવ્યકૃત્ પણ્ડિતો માની વિનીતો વાહનાન્વિતઃ ॥ ૫૧॥

કદર્યઃ ક્રૂરકર્તા ચ કૃશાઙ્ગો ધનવર્જિતઃ ।
સહજસ્થે તુ શિખિનિ તીવ્રરોગી પ્રજાયતે ॥ ૫૨॥

રૂપવાન્ ગુણસમ્પન્નઃ સાત્ત્વિકોઽપિ સ્તુતિપ્રિયઃ ।
સુખસંસ્થે તુ શિખિનિ સદા ભવતિ સૌખ્યભાક્ ॥ ૫૩॥

સુખી ભોગી કલાવિચ્ચ પઞ્ચમસ્થાનગે ધ્વજે ।
યુક્તિજ્ઞો મતિમાન્ વાગ્મી ગુરુભક્તિસમન્વિતઃ ॥ ૫૪॥

માતૃપક્ષક્ષયકરઃ શત્રુહા બહુવાન્ધવઃ ।
રિપુસ્થાને ધ્વજે પ્રાપ્તે શૂરઃ કાન્તો વિચક્ષણઃ ॥ ૫૫॥

દ્યૂતક્રીડાષ્વભિરતઃ કામી ભોગસમન્વિતઃ ।
ધ્વજે તુ સપ્તમસ્થાગે વેશ્યાસુ કૃતસૌહૃદઃ ॥ ૫૬॥

નીચકર્મરતઃ પાપો નિર્લજ્જો નિન્દકઃ સદા ।
મૃત્યુસ્થાને ધ્વજે પ્રાપ્તે ગતસ્ત્ર્યપરપક્ષકઃ ॥ ૫૭॥

લિઙ્ગધારી પ્રસન્નાત્મા સર્વભૂતહિતે રતઃ ।
ધર્મભે શિખિનિ પ્રાપ્તે ધર્મકાર્યેષુ કોવિદઃ ॥ ૫૮॥

સુખસૌભાગ્યસમ્પન્નઃ કામિનીનાં ચ વલ્લભઃ ।
દાતા દ્વિજૈઃ સમાયુક્તઃ કર્મસ્થે શિખિનિ દ્વિજ ॥ ૫૯॥

નિત્યલાભઃ સુધર્મી ચ લાભે શિખિનિ પૂજિતઃ ।
ધનાઢ્યઃ સુભગઃ શૂરઃ સુયજ્ઞશ્ચાતિ કોવિદઃ ॥ ૬૦॥

પાપકર્મરતઃ શૂરઃ શ્રદ્ધાહીનોઽઘૃણો નરઃ ।
પરદારરતો રૌદ્રઃ શિખિનિ વ્યયગે સતિ ॥ ૬૧॥

રોગાર્ત્તઃ સતતં કામી પાપાત્માધિગતઃ શઠઃ ।
તનુસ્થે ગુલિકે જાતઃ ખલભાવોઽતિદુઃખિતઃ ॥ ૬૨॥

વિકૃતો દુઃખિતઃ ક્ષુદ્રો વ્યસની ચ ગતત્રપઃ ।
ધનસ્થે ગુલિકે જાતો નિઃસ્વો ભવતિ માનવઃ ॥ ૬૩॥

ચાર્વઙ્ગો ગ્રામપઃ પુણ્યસંયુક્તઃ સજ્જનપ્રિયઃ ।
સહજે ગુલિકે જાતો માનવો રાજપૂજિતઃ ॥ ૬૪॥

રોગી સુખપરિત્યક્તઃ સદા ભવતિ પાપકૃત્ ।
ગુલિકે સુખભાવસ્થે વાતપિત્તાધિકો ભવેત્ ॥ ૬૫॥

વિસ્તુતિર્વિધનોઽલ્પાયુર્દ્વેષી ક્ષુદ્રો નપુંસકઃ ।
ગુલિકે સુતભાવસ્થે સ્ત્રીજિતો નાસ્તિકો ભવેત્ ॥ ૬૬॥

વીતશત્રુઃ સુપુષ્ટાઙ્ગો રિપુસ્થાને યમાત્મજે ।
સુદીપ્તઃ સમ્મતઃ સ્ત્રીણાં સોત્સાહઃ સુદૃઢો હિતઃ ॥ ૬૭॥

સ્ત્રીજિતઃ પાપકૃજ્જારઃ કૃશાઙ્ગો ગતસૌહૃદઃ ।
જીવિતઃ સ્ત્રીધનેનૈવ ગુલિકે સપ્તમસ્થિતે ॥ ૬૮॥

ક્ષુધાલુર્દુઃખિત ક્રૂરસ્તીક્ષ્ણરોષોઽતિનિર્ઘૃણઃ ।
રન્ધ્રગે ગુલિકે નિઃસ્વો જાયતે ગુણવર્જિતઃ ॥ ૬૯॥

બહુક્લેશઃ કૃશતનુર્દુષ્ટકર્માતિનિર્ઘૃણઃ ।
ગુલિકે ધર્મગે મન્દઃ પિશુનો બહિરાકૃતિઃ ॥ ૭૦॥

પુત્રાન્વિતઃ સુખી ભોક્તા દેવાગ્ન્યર્ચનવત્સલઃ ।
દશમે ગુલિકે જાતો યોગધર્માશ્રિતઃ સુખી ॥ ૭૧॥

સુસ્ત્રીભોગી પ્રજાધ્યક્ષો બન્ધૂનાં ચ હિતે રતઃ ।
લાભસ્થે ગુલિકે જાતો નીચાઙ્ગ સાર્વભૌમકઃ ॥ ૭૨॥

નીચકર્માશ્રિતઃ પાપો હીનાઙ્ગો દુર્ભગોઽલસઃ ।
વ્યયગે ગુલિકે જાતો નીચેષુ કુરુતે રતિમ્ ॥ ૭૩॥

લગ્ને પ્રાણપદે ક્ષણો રોગિ ભવતિ માનવઃ ।
મૂકોન્મત્તો જડાઙ્ગસ્તુ હીનાઙ્ગો દુઃખિત કૃશઃ ॥ ૭૪॥

બહુધાન્યો બહુધનો બહુભૃત્યો બહુપ્રજઃ ।
ધનસ્થાનસ્થિતે પ્રાણે સુભગો જયતે નરઃ ॥ ૭૫॥

હિંસ્રો ગર્વસમાયુક્તો નિષ્ઠુરોઽતિમલિમ્લુચઃ ।
તૃતીયગે પ્રાણપદે ગુરુભક્તિવિવર્જિતઃ ॥ ૭૬॥

સુખસ્થે તુ સુખી કાન્તઃ સુહૃદ્રમાસુ વલ્લભઃ ।
ગુરૌ પરાયણઃ શીતઃ પ્રાણે વૈ સત્યતત્પરઃ ॥ ૭૭॥

સુખિભાક્ સુક્રિયોપેતસ્ત્વપચારદયાન્વિતઃ ।
પઞ્ચમસ્થે પ્રાણપદે સર્વકામસમન્વિતઃ ॥ ૭૮॥

બન્ધુશત્રુવશસ્તીક્ષ્ણો મન્દાગ્નિર્નિર્દયઃ ખલઃ ।
ષષ્ઠે પ્રાણપદે રોગી વિત્તપોઽલ્પાયુરેવ ચ ॥ ૭૯॥

ઈર્ષ્યાલુ સતતં કામી તીવ્રરૌદ્રવપુર્નરઃ ।
સપ્તમસ્થે પ્રાણપદે દુરારાધ્યઃ કુબુદ્ધિમાન્ ॥ ૮૦॥

રોગસન્તાપિતાઙ્ગશ્ચ પ્રાણપદેઽષ્ટમે સતિ ।
પીડિતઃ પાર્થિવૈર્દુઃખૈર્મૃત્યબન્ધુસુતોદ્ભવૈઃ ॥ ૮૧॥

પુત્રવાન્ ધનસમ્પન્નઃ સુભગઃ પ્રિયદર્શનઃ ।
પ્રાણે ધર્મસ્થિતે ભૃત્યઃ સદાઽદુષ્ટો વિચક્ષણઃ ॥ ૮૨॥

વીર્યવાન્ મતિમાન્ દક્ષો નૃપકાર્યેષુ કોવિદઃ ।
દશમે વૈ પ્રાણપદે દેવાર્ચનપરાયણઃ ॥ ૮૩॥

વિખ્યાતો ગુણવાન્ પ્રાજ્ઞો ભોગીધ નસમન્વિતઃ ।
લાભસ્થાનસ્થિતે પ્રાણે ગૌરાઙ્ગો માતૃવત્સલઃ ॥ ૮૪॥

ક્ષુદ્રો દુષ્ટસ્તુ હીનાઙ્ગો વિદ્વેશી દ્વિજબન્ધુષુ ।

વ્યયે પ્રાણે નેત્રરોગી કાણો વા જાયતે નરઃ ॥ ૮૫॥

ઇત્યપ્રકાશખેટાનાં ફલાન્યુક્તાનિ ભૂસુર ।
તથા યાનિ પ્રકાશાનાં સૂર્યાદીનાં ખચારિણામ્ ॥ ૮૬॥

તાનિ સ્થિતિવશાત્તેષાં સ્ફુટદૃષ્ટિવશાત્ તથા ।
બલાઽબલવિવેકેન વક્તવ્યાનિ શરીરિણામ્ ॥ ૮૭॥

---

અથે ગ્રહસ્ફુટદૃષ્ટિકથનાધ્યયાઃ ॥ ૨૬॥

ભગવાન્ કતિધા દૃષ્ટિર્બલં કતિવિધં તથા ।
ઇતિ મે સંશયો જાતસ્તં ભવાન્ છેત્તુમર્હિતિ ॥ ૧॥

એકા રાશિવશાદ્ દૃષ્ટિઃ પૂર્વમુક્તા ચ યા દ્વિજ ।
અન્યા ખેટસ્વભાવોત્થા સ્ફુટા તાં કથયામ્યહમ્ ॥ ૨॥

ત્રિદશે ચ ત્રિકોણે ચ ચતુરસ્રે ચ સપ્તમે ।
પાદવૃદ્ધ્યા પ્રપશ્યન્તિ પ્રયચ્છન્તિ ફલં તથા ॥ ૩॥

પૂર્ણં ચ સપ્તમં સર્વે શાનિજીવકુજાઃ પુનઃ ।
વિશેષતશ્ચ ત્રિદશત્રિકોણચતુરષ્ટમાન્ ॥ ૪॥

ઇતિ સામાન્યતઃ પૂર્વૈરાચાર્યૈઃ પ્રતિપાદિતા ।
સ્ફુટાન્તરવશાદ્યા ચ દૃષ્ટિઃ સાઽતિસ્ફુટા યથા ॥ ૫॥

દૃશ્યાદ્ વિશોધ્ય દ્રષ્ટારં ષડ્રાશિભ્યોઽધિકાન્તરમ્ ।
દિગ્ભ્યઃ સંશોધ્ય તદ્ભાગા દ્વિભક્તા દૃક્ સ્ફુટા ભવેત્ ॥ ૬॥

પઞ્ચાધિકે વિના રાશિં ભાગાદ્દ્વિઘ્નાશ્ચ દૃક્ સ્ફુટા ।
વેદાધિકે ત્યજેદ્ ભૂતાદ્ ભાગા દૃષ્ટિઃ ત્રિભાધિકે ॥ ૭॥

વિશોધ્યાર્ણવતો દ્વાભ્યાં લબ્ધં ત્રિંશદ્યુતં ચ દૃક્ ।
દ્વ્યધિકે તુ વિના રાશિં ભાગાસ્તિથિયુતાસ્તથા ॥ ૮॥

રૂપાધિકે વિના રાશિં ભાગા દ્વયાપ્તાશ્ચ દૃગ્ ભવેત્ ।
એવં રાશ્યાદિકે શેષે શનૌ દ્રષ્ટરિ ભો દ્વિજ ॥ ૯॥

એકભે નવભે ભાગા ભુક્તા ભોગ્યા દ્વિસંગુણાઃ ।
દ્વિભેઽશાર્ધોનિતાઃ ષષ્ટિરષ્ટભે ખાગ્નિયુગ્ લવાઃ ॥ ૧૦॥

ત્રિસપ્તભે તુ ભૌમસ્ય ષષ્ટિરત્ર લવોનિતા ।
સાર્ધાંશાસ્તિથિસંયુક્તા દ્વિભે રૂપં સદાઽઙ્ગભે ॥ ૧૧॥

ત્રિસપ્તભે તુ જીવસ્ય ભાગાર્ધં શરવેદયુક્ ।
દ્વિગુણૈસ્તુ લવૈશ્ચોનાઃ ખરસાશ્ચતુરષ્ટભે ॥ ૧૨॥

એવં રવ્યાદિખેટાનાં સ્ફુટા દૃષ્ટિઃ પ્રજાયતે ।
તદ્વશાદેવ ભાવાનાં જાતકસ્ય ફલં વદેત્ ॥ ૧૩॥

## અથ સ્પષ્ટબલાધ્યાયઃ ॥ ૨૭॥

અથ સ્પષ્ટબલં વક્ષ્યે સ્થાનકાલાદિસમ્ભવમ્ ।
નીચોનાં ખચરં ભાર્ધાધિક ચક્રાદ્ વિશોધયેત્ ॥ ૧॥

ભાગીકૃત્ય ત્રિભિર્ભક્તં લબ્ધમુચ્ચબલં ભવેત્ ।
સ્વત્રિકોણસ્વગેહાધિમિત્રમિત્રસમારિષુ ॥ ૨॥

અધિશત્રુગૃહે ચાપિ સ્થિતાનાં ક્રમશો બલમ્ ।
ભૂતાબ્ધયઃ ખાગ્નિનખાસ્તિથ્યો દશ યુગાઃ કરાઃ ॥ ૩॥

એવં હોરાદૃકાણાદ્રિભાગાંકદ્વાદશાંશજમ્ ।
ત્રિંશાંશજં તદૈક્યઞ્ચ સપ્તવર્ગસમુદ્ભવમ્ ॥ ૪॥

શુક્રેન્દૂ સમભાંશેઽન્યે વિષમેઽઙ્ઘ્રિમિતં બલમ્ ।
કેન્દ્રાદિષુસ્થિતાઃ ખેટાઃ પૂર્ણાઽર્ધાઽઙ્ઘ્રિમિતં ક્રમાત્ ॥ ૫॥

આદ્યમધ્યાવસાનેષુ દ્રેષ્કાણેષુ સ્થિતાઃ ક્રમાત્ ।
પુંનપુંસકયોષાખ્યા દદ્યુરઙ્ઘ્રિમિતં બલમ્ ॥ ૬॥

સૂર્યાત્ કુજાત્ સુખં જીવાજ્જ્ઞાચ્ચાઽસ્તં લગ્નમાર્કિતઃ ।
દશમં ચ ભૃગોશ્ચન્દ્રાદ્ હિત્વા ષડ્ભાધિકે સતિ ॥ ૭॥

ચક્રાદ્ વિશોધ્ય તદ્ભાગાસ્ત્રિભિર્ભક્તાશ્ચ દિગ્બલમ્ ।
ઇષ્ટાઘટિ નિશીથાત્તન્નતં ત્રિંશચ્ચ્યુતં નતમ્ ॥ ૮॥

ચન્દ્રભૌમશનીનાં ચ નતં દ્વિઘ્નં કલાદિકમ્ ।
ષષ્ટિશુદ્ધં તદન્યેષાં સદા રૂપં બુધસ્ય હિ ॥ ૯॥

અથ પક્ષબલં વક્ષ્યે સૂર્યે ચન્દ્રાદ્ વિશોધ્ય ચ ।
ષડ્ભાધિકે વિશોધ્યાર્કાદ્ ભાગીકૃત્ત્ય ત્રિભિર્ભજેત્ ॥ ૧૦॥

પક્ષજં બલમિન્દુજ્ઞાશુક્રેજ્યાનાં તુ ષષ્ટિતઃ ।
વિશોધ્ય તબ્દલં જ્ઞેનં પાપાનાં પક્ષસંભવમ્ ॥ ૧૧॥

દિનત્ર્યંશેષુ સૌમ્યાર્કશનીનાં નિટ્ત્રિભાગકે ।
ચન્દ્રશુક્રકુજાનાં ચ બલં પૂર્ણં સદા ગુરોઃ ॥ ૧૨॥

વષમાસદિનેશાનાં તિથ્યસ્ત્રિંશચ્છરાર્ણવામ્ ।
હોરેશસ્ય બલં ષષ્ટિરુક્તં નૈસર્ગિકં પુરા ॥ ૧૩॥

તન્માનાં સપ્તહૃત્ષષ્ટિરેકાદ્યેકોત્તરૈર્હતા ।
શમંબુગુશુચંરાદિખેટાનાં ક્રમતો દ્વિજ ॥ ૧૪॥

પઞ્ચાબ્ધયઃ સુરાઃ સૂર્યાઃ ખણ્ડકાંશાઃ ક્રમાદમી ।
સાયનગ્રહદોરાશિતુલ્યખણ્ડયુતિશ્ચ સ ॥ ૧૫॥

ભાગાદિકહતાદેષ્યાત્ ત્રિંશલ્લબ્ધયુતા લવાઃ ।
સ્વમૃણં તુલમેષાદૌ શનીન્દ્વોશ્ચ ત્રિરાશિષુ ॥ ૧૬॥

તથાઽરાર્કેજ્યશુક્રાણાં વ્યસ્તં જ્ઞસ્ય સદા ધનમ્ ।
તદ્ભાગાશ્ચ ત્રિભિર્ભક્તા જ્ઞેયમાયનજં બલમ્ ॥ ૧૭॥

યદ્રવેરાયનં વીર્યં ચેષ્ટાખ્યં તાવદેવ હિ ।
વિધોઃ પક્ષબલં યાવત્ તાવચ્ચેષ્ટાબલં સ્મૃતમ્ ॥ ૧૮॥

પાપદૃક્પાદહીનં તચ્છુભદૃક્પાદયુક્ તથા ।
બલૈક્યં જ્ઞેજ્યદૃક્યુક્તમેવં ખેટબલં ભવેત્ ॥ ૧૯॥

અથ તારગ્રહાણાં તુ યુદ્ધ્યતોશ્ચ દ્વયોર્મિથઃ ।
બલાન્તરં વિજેતુઃ સ્વં નિર્જિતસ્ય બલે ત્વૃણમ્ ॥ ૨૦॥

ચક્રાનુવક્રા વિકલા મન્દા મન્દતરા સમા ।
ચરા ચાઽતિચરા ચેતિ ગ્રહાણામષ્ટધા ગતિઃ ॥ ૨૧॥

ષષ્ટિર્વક્રગતે વીર્યમનુવક્રગતેર્દલમ્ ।
પાદો વિકલભુક્તેઃ સ્યાત્ તથા મધ્યગતેર્દલમ્ ॥ ૨૨॥

પાદો મન્દગતેસ્તસ્ય દલં મન્દતરસ્ય હિ ।
ચરભુક્તેસ્તુ પાદોનાં દલં સ્યાદતિચારિણઃ ॥ ૨૩॥

મધ્યમસ્ફુટયોગાર્ધહીનં સ્વસ્વચલોચ્ચકમ્ ।

ષડ્ભાધિકં ચ્યુતં ચક્રાચ્ચેષ્ટાકેન્દ્રં સ્મૃતં કુજાત્ ॥ ૨૪॥

ભાગીકૃતં ત્રિભિર્ભક્તં લબ્ધં ચેષ્ટાબલં ત્વિતિ ।
સ્થાનદિક્કાલદૃક્ચેષ્ટાનિસર્ગોત્થં ચ ષડ્વિધમ્ ॥ ૨૫॥

એવં ગ્રહબલં પ્રોક્તમથ ભાવબલં શ ृણુ ।
કન્યાયુગ્મતુલાકુમ્ભચાપાદ્યાર્ધાશ્ચ સપ્તમમ્ ॥ ૨૬॥

ગોડજસિંહમૃગાદ્યાર્ધચાપાન્ત્યાર્ધાત્ સુખં ત્યજેત્ ।
કર્કવૃશ્ચિકતો લગ્નં મૃગાત્યાર્ધાજ્ઝષાશ્ચ ખમ્ ॥ ૨૭॥

શોધ્યમઙ્ગાધિકં ચક્રાચ્ચ્યુતં ભાગીકૃતં ત્રિહૃત્ ।
સદૃષ્ટિપાદયુક્પાપપાપદૃષ્ટિપાદવિવર્જિતમ્ ॥ ૨૮॥

જ્ઞેજ્યદૃષ્ટિયુતં તચ્ચ સ્વસ્વસ્વામિબલાન્વિતમ્ ।
ઇતિ ભાવબલં સ્પષ્ટં સામાન્યં ચ પુરોદિતમ્ ॥ ૨૯॥

બુધેજ્યયુક્તભાવસ્ય બલમેકેન સંયુતમ્ ।
મન્દારરવિયુક્તસ્ય બલમેકેન વર્જિતમ્ ॥ ૩૦॥

દિને શીર્ષોદયો ભાવઃ સન્ધ્યાયામુભયોદયઃ ।
નિશિ પૃષ્ઠોદયાખ્યશ્ચ દદ્યાત્ પાદમિતં બલમ્ ॥ ૩૧॥

અંકાગ્નયોઽઙ્ગરામાશ્ચ ખાગ્નયા કરસિન્ધવઃ ।
નવાગ્નયઃ સુરાસ્ત્રિંશદ્ દશસંગુણિતાઃ ક્રમાત્ ॥ ૩૨॥

રવ્યાદીનાં બલૈક્યશ્ચેત્ તદા સુબલિનો મતાઃ ।
અધિકં પૂર્ણમેવ સ્યાદ્ બલં ચેદ્બલિનો દ્વિજ ॥ ૩૩॥

ગુરુસૌમ્યરવીણાં તુ ભૂતષટ્કેન્દવો દ્વિજ ।
પંચાગ્નયઃ ખભૂતાનિ કરભૂમિસુધાકરાઃ ॥ ૩૪॥

ખાગ્નયશ્ચ ક્રમાત્સ્થાનદિક્ચેષ્ટાસમયાડયને ।
સિતેન્દ્વોસ્ત્ર્યગ્નિચન્દ્રાશ્ચ ખેષવઃ ખાગ્નયઃ શતમ્ ॥ ૩૫॥

ચત્વારિંશત્ કલા ભૌમમન્દયોઃ ષણ્ણવ ક્રમાત્ ।
ત્રિંશત્ ખવેદાઃ સપ્તાઙ્ગા નખાશ્ચેત્યુદિતા દ્વિજ ॥ ૩૬॥

એવં કૃત્વા બલૈક્યંચ તતશ્ચિન્ત્યમ્ ફલં દ્વિજ ।
ભાવસ્થાનગ્રહૈઃ પ્રોક્તયોગે યે યોગહેતવઃ ॥ ૩૭॥

તેષાં મધ્યે બલી કર્તા સ એવાઽસ્ય ફલપ્રદઃ ।
યોગેષ્વાપ્તેષુ બહુષુ નીતિરેવં પ્રકીર્તિતા ॥ ૩૮॥

ગણિતેષુ પ્રવીણો યઃ શબ્દશાસ્ત્રે કૃતશ્રમઃ ।
ન્યાયવિદ્ બુદ્ધિમાન્ દેશદિક્કાલજ્ઞો જિતેન્દ્રિયઃ ॥ ૩૯॥

ઊહાપોહપટુર્હોરાસ્કન્ધશ્રવણસમ્મતઃ ।
મૈત્રેય સત્યતાં યાદિ તસ્ય વાક્યં ન સંશયઃ ॥ ૪૦॥

---

## અથેષ્ટકષ્ટાધ્યાયઃ ॥ ૨૮॥

અથ ચેષ્ટમનિષ્ટં ચ ગ્રહાનાં કથયામ્યહમ્ ।
યદ્વશાચ્ચ પ્રયચ્છન્તિ શુભાઽશુભદશાફલમ્ ॥ ૧॥

સ્વનીચોનો ગ્રહ શોધ્યઃ ષડ્ભાધિક્યે ભમણ્ડલાત્ ।
સૈકો રાશિર્ભવેદુચ્ચરશ્મિર્દ્વિઘ્નાંશસંયુતઃ ॥ ૨॥

ચેષ્ટાકેન્દ્રાચ્ચ તદ્રશ્મિં સાધયેદુચ્ચરશ્મિવત્ ।
ચેષ્ટાકેન્દ્રં કુજાદીનાં પૂર્વમુક્તં મયા દ્વિજ ॥ ૩॥

સાયનાર્કસ્ત્રિભોઽર્કસ્ય વ્યર્કેન્દુશ્ચ વિધોસ્તથા ।
ચેષ્ટાકેન્દ્રં રસાલ્પં તચ્ચક્રાચ્છોધ્યં રસાધિકે ॥ ૪॥

ચેષ્ટોચ્ચરશ્મિયોગાર્ધં શુભરશ્મિઃ પ્રકીર્ત્યતે ।
અષ્ટભ્યશ્ચ વિશુદ્ધોઽસાબશુભાખ્યશ્ચ કથ્યતે ॥ ૫॥

ઉચ્ચચેષ્ટાકરાન્ વ્યેકાન્ દિગ્ભિર્હત્વા તુ યોજયેત્ ।
તદર્ધમિષ્ટસંજ્ઞં સ્યાત્ કષ્ટં તત્ષષ્ટિતશ્ચ્યુતમ્ ॥ ૬॥

સ્વોચ્ચે મૂલત્રિકોણે ચ સ્વભેઽધિસુહૃદીષ્ટભે ।
સમભે શત્રુભે ચાધિશત્રુભે નીચભે ક્રમાત્ ॥ ૭॥

ષષ્ટિરિષ્વબ્ધયસ્ત્રિંશદાકૃતિસ્તિથયો ગજાઃ ।
ચત્વારો દ્વૌ ચ શૂન્યં ચ શુભમેતત્ફલં ગૃહે ॥ ૮॥

ષષ્ટિતઃ પતિતં ચૈતચ્છેષં સ્યાદશુભં ગૃહે ।
તદર્ધમન્યવર્ગેષુ જ્ઞેયં વિપ્ર શુભાઽશુભમ્ ॥ ૯॥

પઞ્ચસ્વિષ્ટફલં ચાદ્યાત્ સમં ષષ્ઠે તતઃ પરમ્ ।
અશુભં ત્રિષુ વિજ્ઞેયમિતિ શાસ્ત્રેષુ નિશ્ચિતમ્ ॥ ૧૦॥

દિગ્બલં દિક્ફલં તસ્ય તથા દિનફલં ભવેત્ ।
તયોઃ ફલં શુભં પ્રોક્તમશુભં ષષ્ટિતશ્ચ્યુતમ્ ॥ ૧૧॥

શુભેઽધિકે શુભં જ્ઞેયમશુભં ત્વશુભેઽધિકે ।
દશાફલં નભોગસ્ય તથા ભાવફલં દ્વિજ ॥ ૧૨॥

બલૈઃ ષડ્ભિઃ સમોધિત્વા બલૈક્યેન ભજેત્ પૃથક્ ।
તત્તદ્બલફલાનિ સ્યુરશુભાનિ શુભાનિ ચ ॥ ૧૩॥

શુભપાપફલાભ્યાં ચ હન્યાદ્ દૃષ્ટિં બલં તથા ।
દૃષ્ટી તે શુભપાપાખ્યે બલે સ્યાતાં તદાહ્વયે ॥ ૧૪॥

ભાવાનાં ચ ફલે પ્રોક્તે પતીનાં ચ ફલે ઉભે ।
રાશૌ શુભનભોગશ્ચેદ્ ભાવસાધનસંભવમ્ ॥ ૧૫॥

ફલં તસ્ય શુભે યુઞ્જ્યાદશુભે વર્જયેત્ તથા ।
પાપશ્ચેદન્યથા ચૈવં બલે દૃષ્ટ્યાં તથૈવ ચ ॥ ૧૬॥

યુઞ્જ્યાદુચ્ચાદિગે ખેટે ફલં નીચાદિગે ત્યજેત્ ।
એવં શુભાઽશુભં જ્ઞાત્વા જાતકસ્ય ફલં વદેત્ ॥ ૧૭॥

અષ્ટવર્ગફલં ચૈવં સ્થાને ચ કરણેઽન્યથા ।
રાશિદ્વયગતે ભાવે તદ્રાશ્યધિપતેઃ ક્રિયા ॥ ૧૮॥

સ્થાનાધિકેન ભાવેન ભાવલાભઃ પ્રકીર્તિતઃ ।
તત્સમાને ચ તદ્ભાવે તદાનીં સ્થાનદાન્ ગ્રહાન્ ॥ ૧૯॥

સંયોજ્યે સ્થાનસંખ્યાયા દલમેતત્સમં ફલમ્ ।
એવં સખેટભાવાનાં ફલં જ્ઞેયં શુભાઽશુભમ્ ॥ ૨૦॥

---

## અથ પદાધ્યાયઃ ॥ ૨૯॥

કથ્યામ્યથા ભાવાનાં ખેટાનાં ચ પદં દ્વિજ ।
તદ્વિશેષફલં જ્ઞાતું યથોક્તં પ્રાઙ્ મહર્ષિભિઃ ॥ ૧॥

લગ્નાદ્ યાવતિથે રાશૌ તિષ્ઠેલ્લગ્નેશ્વરઃ ક્રમાત્ ।
તતસ્તાવતિથે રાશૌ લગ્નસ્ય પદમુચ્યતે ॥ ૨॥

સર્વેષામાપ ભાવાનાં જ્ઞેયમેવં પદં દ્વિજ ।

તનુભાવપદં તત્ર બુધા મુખ્યપદં વિદુઃ ॥ ૩॥

સ્વસ્થાનં સપ્તમં નૈવં પદં ભવિતુમર્હતિ ।
તસ્મિન્ પદત્વે વિજ્ઞેયં મધ્યં તુર્યં ક્રમાત્ પદમ્ ॥ ૪॥

યથા તુર્યસ્થિતે નાથે તુર્યમેવ પદં ભવેત્ ।
સપ્તમે ચ સ્થિતે નાથે વિજ્ઞેયં દશમં પદમ્ ॥ ૫॥

યસ્માદ્ યાવતિથે રાશૌ ખેટાત્ તદ્ભવનં દ્વિજ ।
તતસ્તાવતિથં રાશિં ખેટારૂઢં પ્રચક્ષતે ॥ ૬॥

દ્વિનાથદ્વિભયોરેવં વિજ્ઞેયં સબલાવધિ ।
વિગણય્ય પદં વિપ્ર તતસ્તસ્ય ફલં વદેત્ ॥ ૭॥

અથાઽહં પદમાશ્રિત્ય ફલં કિઞ્ચિદ્ બ્રુવે દ્વિજ ।
પદાદેકાદશે સ્થાને ગ્રહૈર્યુક્તોઽથવેક્ષિતે ॥ ૮॥

ધનવાન્ જાયતે બાલસ્તથા સુખસમન્વિતઃ ।
શુભયોગાત્ સુમાર્ગેણ ધનાપ્તિઃ પાપતોઽન્તથા ॥ ૯॥

મિશ્રૈર્મિશ્રં ફલં જ્ઞેયં સ્વોચ્ચમિત્રાદિગેહગૈઃ ।
બહુધા જાયતે લાભો બહુધા ચ સુખાગમઃ ॥ ૧૦॥

પદાલ્લાભગૃહં યસ્ય પશ્યન્તિ સકલા ગ્રહાઃ ।
રાજા વા રાજતુલ્યો વા સ જાતો નાત્ર સંશયઃ ॥ ૧૧॥

પદાલ્લાભગૃહં પશ્યેદ્ વ્યયં કશ્ચિન્ન પશ્યતિ ।
અવિઘ્નેન સદા લાભો જાયતે દ્વિજસત્તમ ॥ ૧૨॥

ગ્રહદૃગ્યોગબાહુલ્યે પદાદેકાદશે દ્વિજ ।
સાર્ગલે ચાપિ તત્રાપિ બહ્વર્ગલસમાગમે ॥ ૧૩॥

શુભગ્રહાર્ગલે વિપ્ર તત્રાપ્યુચ્ચગ્રહાર્ગલે ।
શુભેન સ્વામિના દૃષ્ટે લગ્નભાગ્યાદિગેન વા ॥ ૧૪॥

જાતસ્ય ભાગ્યપ્રાબલ્યં નિર્દિશેદુત્તરોત્તરમ્ ।
ઉક્તયોગેષુ ચેત્ ખેટે દ્વાદશં નૈવ પશ્યતિ ॥ ૧૫॥

પદસ્થાનાદ્ વ્યયે વિપ્ર શુભપાપયુતેક્ષિતે ।
વ્યયબાહુલ્યમિત્યેવં વિશેષોપાર્જનાત્ સદા ॥ ૧૬॥

શુભગ્રહે સુમાર્ગેણ કુમાર્ગાત્ પાપખેચરે ।
મિશ્રે મિશ્રફલં વાચ્યમેવં લાભોઽપિ લાભગે ॥ ૧૭॥

પદારૂઢાદ્ વ્યયે શુક્રભાનુસ્વર્ભાનુભિર્યુતે ।
રાજમૂલાદ્ વ્યયો વાચ્યશ્ચન્દ્રદૃષ્ટ્યા વિશેષતઃ ॥ ૧૮॥

પદારૂઢાદ્ વ્યયે સૌમ્યે શુભખેટયુતેક્ષિતે ।
જ્ઞાતિમધ્યે વ્યયો નિત્યં પાપદૃક્ કલહાદ્ વ્યયઃ ॥ ૧૯॥

પદાદ્ વ્યયે સુરાચાર્યે વીક્ષિતે ચાન્યખેચરૈઃ ।
કરમૂલાદ્ વ્યયો વાચ્યઃ સ્વસ્યૈવ દ્વિજસત્તમ ॥ ૨૦॥

આરૂઢાદ્ દ્વાદશે સૌરે ધરાપુત્રેણ સંયુતે ।
અન્યગ્રહેક્ષિતે વિપ્ર ભ્રાતૃવર્ગાદ્ ધનવ્યયઃ ॥ ૨૧॥

આરૂઢાદ્ દ્વાદશે સ્થાને યે યોગાઃ કથિતા યથા ।
લાભભાવે ચ તે યોગા લાભયોગકરાસ્તથા ॥ ૨૨॥

આરૂઢાત્ સપ્તમે રાહુરથવા સંસ્થિતઃ શિખી ।
કુક્ષિવ્યથાયુતો બાલઃ શિખિના પીડિતોʼથ વા ॥ ૨૩॥

આરૂધાત્ સપ્તમે કેતુઃ પાપખેટયુતેક્ષિતઃ ।
સાહસી શ્વેતકેશી ચ વૃધ્દ્ધલિઙ્ગી ભવેન્નરઃ ॥ ૨૪॥

પદાત્તુ સપ્તમે સ્થાને ગુરુશુક્રનિશાકરાઃ ।
ત્રયો દ્વયમથૈકોઽપિ લક્ષ્મીવાન્ જાયતે જનઃ ॥ ૨૫॥

સ્વતુઙ્ગે સપ્તમે ખેટઃ શુભો વાઽપ્યશુભઃ પદાત્ ।
શ્રીમાન્ સોઽપિ ભવેન્નુનં સત્કીર્તિસહિતો દ્વિજ ॥ ૨૬॥

યે યોગાઃ સપ્તમે સ્થાને પદાશ્ચ કથિતા મયા ।
ચિન્ત્યાસ્તથૈવ તે યોગા દ્વિતીયેઽપિ સદા દ્વિજ ॥ ૨૭॥

ઉચ્ચસ્થો રૌહિણેયો વા જીવો વા શુક્ર એવ વા ।
એવો બલી ધનગતઃ શ્રિયં દિશતિ દેહિનઃ ॥ ૨૮॥

યે યોગાશ્ચ પદે લગ્ને યથાવદ્ ગદિતા મયા ।
તે યોગાઃ કારકાંશેઽપિ વિજ્ઞેયા બાંધવર્જિતાઃ ॥ ૨૯॥

આરૂઢાદ્ વિત્તભે સૌમ્યે સર્વદેશાધિપો ભવેત્ ।
સર્વજ્ઞો યદિ વા સ સ્યાત્ કવિર્વાદી ચ ભાર્ગવે ॥ ૩૦॥

આરૂધાત્ કેન્દ્રકોણેષુ સ્થિતે દારપદે દ્વિજ ।
લગ્નજાયાપદે વાપિ સબલગ્રહસંયુતે ॥ ૩૧॥

સ્ર્/ઈમાંશ્ચ જાયતે નૂનં દેશે વિખ્યાતિમાન્ ભવેત્ ।
ષષ્ઠેષ્ટમે વ્યયસ્થાને જાતો દારપદેઽધનઃ ॥ ૩૨॥

પદે તત્સપ્તમે વાપિ કેન્દ્રે વૃદ્ધૌ ત્રિકોણકે ।
સુવીર્યઃ સંસ્થિતઃ ખેતઃ ભાર્યાભર્તૃસુખપ્રદઃ ॥ ૩૩॥

પદાદ્દારપદે ચૈવં કેન્દ્રે કોણે ચ સંસ્થિતે ।
દ્વયોર્મૈત્રી ભવેન્નૂનં ત્રિકે વૈરં ન સંશયઃ ॥ ૩૪॥

એવં લગ્નપદાદ્ વિપ્ર તનયાદિપદે સ્થિતે ।
મિત્રામિત્રે વિજાનીયાલ્લાભાલાભૌ વિચક્ષણઃ ॥ ૩૫॥

લગ્નદારપદે વિપ્ર મિથઃ કેન્દ્રગતે યદિ ।
ત્રિલાભયોસ્ત્રિકોણે વા તથા રાજા ધરાધિપઃ ॥ ૩૬॥

એવં લગ્નપદાદેવ ધનાદિપદતો દ્વિજ ।
સ્થાનદ્વયં સમાલોક્ય જાતકસ્ય ફલં વદેત્ ॥ ૩૭॥

---

અથોપપદાધ્યાયઃ ॥ ૩૦॥

અથોપપદમાશ્રિત્ય કથયામિ ફલં દ્વિજ ।
યુચ્છુભત્વે ભવેન્નૃણાં પુત્રદારાદિજં સુખમ્ ॥ ૧॥

તનુભાવપદં વિપ્ર પ્રધાનં પદમુચ્યતે ।
તનોરનુચરાદ્યત્ સ્યાદુપારૂઢં તદુચ્યતે ॥ ૨॥

તદેવોપપદં નામ તથા ગૌણપદં સ્મૃતમ્ ।
શુભખેટગૃહે તસ્મિન્ શુભગ્રહયુતેક્ષિતે ॥ ૩॥

પુત્રદારસુખં પૂર્ણં જાયતે દ્વિજસત્તમ ।
પાપગ્રહયુતે તત્ર પાપભે પાપવીક્ષિતે ॥ ૪॥

પ્રવ્રાજકો ભવેજ્જતો દારહીનોઽથ વા નરઃ ।
શુભદૃગ્યોગતો નૈવ યોગોઽયં દારનાશકઃ ॥ ૫॥

રવિર્નૈવાત્ર પાપઃ સ્યાત્ સ્વોચ્ચમિત્રસ્વભસ્થિતઃ ।

નીચશત્રુગૃહસ્થશ્ચેત્તદાऽસૌ પાપ એવ હિ ॥ ૬॥

શુભગ્રહાણાં દૃષ્ટિશ્ચેદુપારૂઢાદ્ દ્વિતીયકે ।
શુભર્ક્ષે શુભયુક્તે ચ પૂર્વોક્તં હિ ફલં સ્મૃતમ્ ॥ ૭॥

ઉપારૂઢાદ્ દ્વિતીયં ચ નીચાંશે નીચખેટયુક્ ।
ક્રૂરગ્રહસમાયુક્તં જાતકો દારહા ભવેત્ ॥ ૮॥

સ્વોચ્ચાંશે સ્વોચ્ચસંસ્થે વા તુઙ્ગદૃષ્ટિવશાત્ તથા ।
ભવન્તિ બહવો દારા રૂપલક્ષણસંયુતાઃ ॥ ૯॥

ઉપારૂઢે દ્વિતીયે વા મિથુને સંસ્થિતે સતિ ।
તત્ર જાતનરો વિપ્ર બહુદારયુતો ભવેત્ ॥ ૧૦॥

ઉપારૂઢે દ્વિતીયેऽપિ સ્વસ્વામિગ્રહસંયુતે ।
સ્વર્ક્ષગે તત્પતૌ વાપિ યત્ર કુત્રાપિ ભૂસુર ॥ ૧૧॥

યસ્ય જન્મનિ યોગોऽયં સ નરો દ્વિજસત્તમ ।
ઉત્તરાયુષિ નિર્દારો ભવત્યેવ ન સંશયઃ ॥ ૧૨॥

સ્વરાશૌ સંસ્થિતેऽપ્યેવં નિત્યાખ્યે દારકારકે ।
ઉત્તરાયુષિ નિર્દારો ભવત્યેવ ન સંશયઃ ॥ ૧૩॥

ઉપારૂઢપતિઃ સ્વોચ્ચે સ્થિરસ્ત્રીકારકોऽથ વા ।
સુકુલાદ્ દારલાભઃ સ્યાન્નીચસ્થે તુ વિપર્યયાત્ ॥ ૧૪॥

ઉપારૂઢે દ્વિતીયે વા શુભસમ્બધતો દ્વિજ ।
જાતસ્ય સુન્દરી ભાર્યા ભવ્યા રૂપગુણાન્વિતા ॥ ૧૫॥

ઉપારૂઢાદ્ દ્વિતીયે ચ શનિરાહૂ સ્થિતૌ યદિ ।
ઉપવાદાત્ સ્ત્રિયસ્ત્યાગો નાશો વા જાયતે દ્વિજ ॥ ૧૬॥

ઉપારૂઢે દ્વિતીયે વા શિખિશુક્રૌ યદા સ્થિતૌ ।
રક્તપ્રદરરોગાર્તા જાયતે તસ્ય ભામિની ॥ ૧૭॥

બુધકેતૂ સ્થિતૌ તત્ર તદાऽસ્થિસ્રાવસંયુતા ।
તત્રસ્થાઃ શનિરાહ્વર્કાસ્તદાऽસ્થિજ્વરસંયુતા ॥ ૧૮॥

સ્થૂલાઙ્ગી બુધરાહૂભ્યાં તત્રસ્થાભ્યાં દ્વિજોત્તમ ।
બુધક્ષેત્રે કુજાર્કી ચેન્નસિકારોગસંયુતા ॥ ૧૯॥

કુજક્ષેત્રેઽપ્યેવમેવ ફલં જ્ઞેયં દ્વિજોત્તમ ।
બૃહસ્પતિશની તત્ર કર્ણનેત્રરુજાન્વિતા ॥ ૨૦॥

તત્રાન્યગેહગૌ વિપ્ર બુદ્ધભૌમૌ સ્થિતૌ યદા ।
યદા સ્વર્ભાનુદેવેજ્યૌ ભાર્યા દન્તરુજાન્વિતા ॥ ૨૧॥

શનિરાહૂ શનિક્ષેત્રે પઙ્ગુર્વાતરુજાન્વિતા ।
શુભદૃગ્યોગતો નેતિ ફલં જ્ઞેયં વિપશ્ચિતા ॥ ૨૨॥

લગ્નાત્ પદાદુપારૂઢાદ્ યો રાશિઃ સપ્તમો દ્વિજ ।
તસ્માત્ તત્સ્વામિનઃ ખેટાત્ તદંશાચ્ચ દ્વિજોત્તમ ॥ ૨૩॥

એવમેવ ફલં જ્ઞેયમિત્યાહુર્નારદાદયઃ ।
ઉક્તેભ્યો નવમે વિપ્ર શનિચન્દ્રબુધા યદિ ॥ ૨૪॥

અપુત્રતા તથાઽર્કેજ્યરાહુભિર્બહુપુત્રતા ।
ચન્દ્રેણૈકસુતસ્તત્ર મિશ્રૈઃ પુત્રો વિલમ્બતઃ ॥ ૨૫॥

રવીજ્જરાહુયોગેન પુત્રો વીર્યપ્રતાપવાન્ ।
પ્રચણ્ડવિજયી વિપ્ર રિપુનિગ્રહકારકઃ ॥ ૨૬॥

ઉક્તસ્થાને કુજાર્કિભ્યાં પુત્રહીનઃ પ્રજાયતે ।
દત્ત પુત્રયુતો વાપિ સહોત્થસુતવાન્ ભવેત્ ॥ ૨૭॥

તત્રસ્થે વિષમે રાશૌ બહુપુત્ર્યુતો નરઃ ।
સ્વલ્પાપત્યઃ સમે રાશૌ જાયતે દ્વિજસત્તમ ૧ ॥ ૨૮॥

સિંહે ચોપપદે વિપ્ર નિશાનાથયુતેક્ષિતે ।
અલ્પપ્રજોઽથ કન્યાયાં જાતઃ કન્યાપ્રજો ભવેત્ ॥ ૨૯॥

સુતભાવનવાંશાચ્ચ સ્થિરસન્તતિકારકાત્ ।
એવં ત્રિશાંશકુણ્ડલ્યામપિ યોગં વિચિન્તયેત્ ॥ ૩૦॥

શનિરાહૂ ત્રિલાભસ્થૌ પદાદ્ ભ્રાતુર્વિનાશકૌ ।
જ્યેષ્ઠસ્યૈકાદશે તત્ર કનિષ્ઠસ્ય તૃતીયકે ॥ ૩૧॥

દૈતેજ્યે તત્ર ગર્ભસ્ય નાશો વ્યવહિતસ્ય ચ ।
લગ્ને વાપિ પદે રન્ધ્રે દૈત્યાચાર્યયુતેક્ષિતે ॥ ૩૨॥

તથૈવ ફલમિત્યાહુર્નિર્વિશંકં મુનીશ્વરાઃ ।
તૃતીયલાભયોર્વિપ્ર ચન્દ્રેજ્યબુધમઙ્ગલાઃ ॥ ૩૩॥

બહવો ભ્રાતરસ્તસ્ય બલવન્તઃ પ્રતાપિનઃ ।
શન્યારસંયુતે દૃષ્ટે તૃતીયૈકાદશે દ્વિજ ॥ ૩૪॥

કનિષ્ઠજ્યેષ્ઠયોર્નાશો દિવજ્ઞેયો દ્વિજસત્તમ ।
શનિરેકો યદા વિપ્ર લાભગો વા તૃતીયગઃ ॥ ૩૫॥

તદા સ્વમાત્રશેષઃ સ્યાદન્યે નશ્યન્તિ સોદરાઃ ।
તૃતીયે લાભગે કેતૌ બહુલં ભગિનીસુખમ્ ॥ ૩૬॥

આરૂઢાત્ ષષ્ઠભાવસ્થે પાપાખ્યે શુભવર્જિતે ।
શુભસમ્બન્ધરહિતે ચૌરો ભવતિ જાતકઃ ॥ ૩૭॥

સપ્તમે દ્વાદશે સ્થાને સૈહિકેયયુતેક્ષિતે ।
જ્ઞાનવાંશ્ચ ભવેદ્ બાલો બહુભાગ્યયુતો દ્વિજ ॥ ૩૮॥

આરૂઢે સંસ્થિતે સૌમ્યે સર્વદેશાધિપો ભવેત્ ।
સર્વજ્ઞસ્તત્ર દેવેજ્યે કવિર્વાદી ચ ભાર્ગવે ॥ ૩૯॥

ઉપારૂઢાત્ પદાદ્ વાપિ ધનસ્થે શુભખેચરે ।
સર્વદ્રવ્યાધિપો ધીમાઞ્જાયતે દ્વિજસત્તમ ॥ ૪૦॥

ઉપારૂઢાદ્ધનાધીશે દ્વિતિયભવનસ્થિતે ।
પાપખેચરસંયુક્તે ચૌરો ભવતિ નિશ્ચિતમ્ ॥ ૪૧॥

તત્સપ્તમગૃહાધીશાદ્ રાહૌ ધનગતે દ્વિજ ।
દંષ્ટ્રાવાન્ જાયતે બાલઃ સ્તબ્ધવાક્ કેતુખેચરે ॥ ૪૨॥

શનૈશ્ચરે કુરૂપઃ સ્યાત્સપ્તમેશાદ્ દ્વિતીયગે ।
મિશ્રગ્રહસમાયુક્તે ફલં મિશ્રં સમાદિશેત્ ॥ ૪૩॥

---

Encoded and proofread by ajarve at fms30.cca.rockwell.com (Ahto Jarve)

---

*bRihatpArAsharahorAshAstramh 21-30*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*